Prostrations to the Sun-god constitute an important ritual; especially for those who are desirous of health and physical well-being. The prostrations assume a series of postures assumed before

the Sun at dawn. Known as`Sūrya-namaskāra', the postures are stylized and accompanied by standard prayer-formulae



























*Namaskāra-mudrā in a Yogāsana posture (bhagiratha-āsana)*

**सौरपुराणान्तर्गतं सूर्यनमस्कारस्तोत्रम्।।**

सूर्यवर्चा उवाच-

मूर्धन्वन्नायुभिः कैस्तु प्रणमद्भुवि भास्करम्।
येषां पठनमात्रेण सर्वपापक्षयो भवेत्।।१।।

मूर्धन्वानुवाच-

प्रत्यहं भक्तियोगेन रविवारे विशेषतः।

संपूज्य विधिवद् भानुं प्रणमेच्च मुहुर्मुहुः।।२।।
अभिषेकाद्यथा शंभुः अलङ्काराद्यथा हरिः।

निवेदनाद् गणाध्यक्षो देवाश्च
हविरादिभिः।।३।।

कव्येन पितरो यद्वत् तर्पणेन महर्षयः।
स्तोत्रपाठाद्यथा शक्तिराचार्यः सेवया यथा।।४।।

यथैव तपसा धर्मः सत्येनैव यथा विधिः।
आज्येनैव यथाग्निस्तु ऋत्विग् दक्षिणया यथा।।५।।

नमस्कारैस्तथा प्रीणात्यादित्यः कर्मदैवतम्।
पूजयाम्युपचाराणां सम्भारणामथापि वा।।६।।

लोकेपि प्रीयते भानुर्नमस्कारैस्तु केवलम्।
तस्मात्सूर्यार्चने कुर्यान्नमस्कारान्विशेषतः।।७।।

सूर्यनमस्कारस्तोत्रम्।।

सूर्य आत्माऽस्य जगतस्तस्थुषश्चेति वेदतः।
जगतामात्मभूताय सूर्याय महसे नमः।।१।।

सूर्याग्न्यन्येन्ययोगेन सायंप्रातर्यदाहुतिः।
अग्निरूपाय सूर्याय ब्रह्मवर्चस्विने नमः।।२।।

आदित्यो वै तेज ओज इत्यादिश्रुतिशासनात्।
ओजसे सर्वभूतानां नमः सूर्याख्यतेजसे।।३।।

आदित्यः सत्यमादित्यो ऋक्सामयजुरात्मकः।
ब्राह्मी सैषा त्रयी विद्या सत्यज्ञानात्मने नमः।।४।।

हिरण्मयोन्तरादित्यो प्रयश्चायमिति श्रुतेः।
आत्मान्तरात्मरूपाय नमस्ते परमात्मने॥५॥

तच्चक्षुरिति वेदेन चक्षोः सूर्य इति श्रुतेः।
चक्षुरिन्द्रियनाथाय चक्षुषे जगतां नमः॥६॥

रश्मिभिर्याभिरादित्यः तपत्येष दिवाकरः।
ताभिर्वर्षति पर्जन्यः तस्मै वृष्टिकृते नमः॥७॥

अदितेर्गर्भतोषाय उदगान्महतोर्णवात्।
रवये लोहिताक्षाय नमस्तस्मै विपश्चिते॥८॥

सर्वेषामपि भूतानां प्राणानादाय भास्करः।
उदेत्यस्तमये याति तस्मै प्राणकृते नमः॥९॥

हंसः शुचिषदित्यादि श्रुतेर्हंसात्मरूपिणे।
नमो ऋताय बृहते तस्मै व्योपसदे नमः॥१०॥

घृणिः सूर्य आदित्यः इत्यष्टाक्षरमन्त्रतः।
सूर्यायादित्यरूपाय घृणये ज्योतिषे नमः॥११॥

विश्वनेत्र महाबाहो विश्वमाभासि रोचनः।
नमस्तस्मै तरणये तस्मै ज्योतिष्कृते नमः॥१२॥

वसूनामपि रुद्राणां आदित्यानां त्वमीश्वरः।
नमः सूर्याय भूतानां प्रत्यक्षाय नमो नमः॥१३॥

इति यः प्रणमेद् भानुं प्रत्यक्षपरदैवतम्।
सर्वपापविशुद्धात्मा सर्वेष्टार्थमवाप्नुयात्॥१४॥

॥इति सूर्यनमस्कारस्तोत्रं सम्पूर्णम्॥

Sūrya is regarded as a visible god (pratyaksha-devatā), and is believed to be pleased with prostrations (`namaskāra-priyo bhānuh'). It is usual to instal a metallic image of Sūrya in the form of a circular maṇḍala, and Sūrya is invoked in it in a formal ritual. To the west of this maṇḍala is installed a square maṇḍala representing Aruṇa (lit. `the dawn'), the charioteer of Sūrya. Both the maṇḍalas are worshipped with all details and sequences (like anga-nyāsa, kara-nyāsa, dhyāna, anga-pūja, pīṭha-pūjā, dvāra-pālaka-pūja, dvādaśa-āvaraṇa pūjā, etc). The customary list of twelve names and also the longer list of one -hundred and eight names are recited at the end. The two lists are given below.

## अथ द्वादशनामपूजा।।

ॐ मित्राय नमः।।१।।

ॐ रवये नमः।।२।।

ॐ सूर्याय नमः।।३।।

ॐ भानवे नमः।।४।।

ॐ खगाय नमः।।५।।

ॐ पूष्णे नमः।।६।।

ॐ हिरण्यगर्भाय नमः।।७।।

ॐ मरीचये नमः।।८।।

ॐ आदित्याय नमः।।९।।

ॐ सवित्रे नमः।।१०।।

ॐ अर्काय नमः।।११।।

ॐ भास्कराय नमः ।।१२।।

इति श्रीसूर्यनारायणस्वामिने नमः।।

## अथ अष्टोत्तरशतनाम पूजा।।

ॐ सूर्याय नमः।।

ॐ अर्यम्णे नमः।।

ॐ भगाय नमः।।

ॐ त्वष्ट्रे नमः।।

ॐ पूष्णे नमः।।

ॐ अर्काय नमः।।

ॐ सवित्रे नमः।।

ॐ रवये नमः।।

ॐ गभस्तिने नमः।।

ॐ अजाय नमः।।

ॐ कालाय नमः।।

ॐ मृत्यवे नमः।।

ॐ धात्रे नमः।।

ॐ प्रभाकराय नमः।।

ॐ पृथिव्यप्तेजसे नमः।।

ॐ सोमाय नमः।।

ॐ बृहस्पतये नमः।।

ॐ शुक्राय नमः।।

ॐ बुधाय नमः।।

ॐ अंगारकाय नमः।।

ॐ इन्द्राय नमः।।

ॐ दिवस्पतये नमः।।

ॐ शुचये नमः।।

ॐ सूरये नमः।।

ॐ ब्रह्मणे नमः।।

ॐ रुद्राय नमः।।

ॐ विष्णवे नमः।।

ॐ स्कन्दाय नमः।।

ॐ वैश्रवणाय नमः।।

ॐ वैद्युताय नमः।।

ॐ जाठराय नमः।।

ॐ अग्नये नमः।।

*Garuḍa (painting from Srirangam temple)*

ॐ ऐन्धनाय नमः।।

ॐ तजसांपतये नमः।।

ॐ धर्मध्वजाय नमः।।

ॐ वेदकर्त्रे नमः।।

ॐ वेदांगाय नमः।।

ॐ वेदवाहनाय नमः।।

ॐ कृतयुगाय नमः।।

ॐ त्रेतायुगाय नमः।।

ॐ द्वापरयुगाय नमः।।

ॐ कलियुगाय नमः।।

ॐ सर्वामराश्रयाय नमः।।

ॐ कलाय नमः।।

ॐ काष्ठाय नमः।।

ॐ मुहूर्ताय नमः।।

ॐ पक्षाय नमः।।

ॐ मासाय नमः।।

ॐ ऋतवे नमः।।

ॐ अयनाय नमः।।

ॐ संवत्सराय नमः।।

ॐ अश्वत्थाय नमः।।

ॐ कालचक्राय नमः।।

ॐ विभवे नमः।।

ॐ पुरुषाय नमः।।

ॐ शाश्वताय नमः।।

ॐ योगिने नमः।।

ॐ व्यक्ताव्यक्ताय नमः।।

ॐ सनातनाय नमः।।

ॐ लोकाध्यक्षाय नमः।।

ॐ सुराध्यक्षाय नमः।।

ॐ विश्वकर्मणे नमः।।

ॐ तमोहन्त्रे नमः।।

ॐ वरुणाय नमः।।

ॐ भार्गवाय नमः।।

ॐ अंशवे नमः।।

ॐ जीमूताय नमः।।

ॐ जीवनाय नमः।।

*Garuḍa (Stone)*

ॐ भूताश्रयाय नमः।।

ॐ भूतपतये नमः।।

ॐ सर्वभूतनिषेवणाय नमः।।

ॐ वेधसे नमः।।

ॐ द्युमणये नमः।।

ॐ सुवर्णाय नमः।।

ॐ भूतादये नमः।।

ॐ कामदाय नमः।।

ॐ सुखदायिने नमः।।

ॐ जयाय नमः।।

ॐ विशालाय नमः।।

ॐ वरदाय नमः।।

ॐ शीघ्राय नमः।।

ॐ प्राणाधाराय नमः।।

ॐ धर्मिणे नमः।।

ॐ धूमकेतवे नमः।।

ॐ आदिदेवाय नमः।।

ॐ अदितिसुताय नमः।।

ॐ द्वादशात्मने नमः।।

ॐ अरविन्दाक्षाय नमः।।

ॐ पित्रे नमः।।

ॐ मात्रे नमः।।

ॐ पितामहाय नमः।।

ॐ स्वर्गद्वाराय नमः।।

ॐ प्रजाद्वाराय नमः।।

ॐ मोक्षद्वाराय नमः।।

ॐ त्रिविष्टपाय नमः।।

ॐ प्रसन्नात्मने नमः।।

ॐ विश्वात्मने नमः।।

ॐ चराचराय नमः।।

ॐ सूक्ष्मात्मने नमः।।

ॐ मित्राय नमः।।

ॐ विनतासुतसारथये नमः।।

ॐ आदित्याय नमः।।

ॐ सवित्रे नमः।।

ॐ सूर्याय नमः।।

ॐ तमोघ्नाय नमः।।

ॐ हिमघ्ने नमः।।

ॐ श्रीछायासंज्ञा समेतसूर्य नारायण स्वामिने नमः।।

इत्यष्टोत्तरशतदिव्यनामपूजा समर्पयामि।।

Following this, the circumambulations and prostrations (pradakshiṇa-namaskāra) are offered, reciting the *Tṛcha-kalpa*, the *Mahā-saura-mantra* (65 verses) of Ṛgveda or the *Aruṇa-mantra* of Krishṇa-yajurveda. The last one is the most popular, and the complete text has been appended below. It consists of 130 mantras. The *Tṛcha-kalpa* has twelve sections, each section relating to one of the names of Sūrya in the list of twelve names (dvādaśa-nāma) given above; and it makes use of the six seed-syllables `hrām', `hrīm', `hrūm', `hraim', `hraum' and `hrah', in normal progression as well as in reverse order (viloma-krama), thus symbolizing the twelve names Mitra, Ravi, Sūrya, Bhānu, Khaga, Pūshan, Hiraṇya-garbha, Marīchi, Āditya, Savitṛ, Arka and Bhāskara.

Here the mantras for the twelve forms are :

१. उद्यन्नद्य मित्रमः।।

२. आरोहन्नुत्तरां दिवम्।।

३. हृद्रोगं मम सूर्य।।

४. हरिमाणं च नाशय।।

५. शुकेषु मे हरिमाणम्।।

६. रोपणाका सुदध्मसि।।

७. अथो हारिद्रवेषु मे।।

८. हरिमाणं निदध्मसि।।

९. उदगादयमादित्यः।।

१०. विश्वेन सहसा सह।।

११. द्विषन्तं मह्यं रन्धयन्।।

१२. मो अहं द्विषते रधम्।।

There are also combinations of seed-syllables and names of Sūrya in a progressive order. The mantras with seed-syllables are given below.

सूर्यनारायण नमस्कारा:।।

ॐ धृणिः सूर्य ............भूर्भुवःसुवरों ।।

श्री सूर्यनारायणाय नमः।। प्रदक्षिणनमस्कारान् समर्पयामि।।

आ सत्येन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च हिरण्मयेन सविता रथेन देवो याति भुवनानि पश्यन्।।

श्रीसूर्यनारायणाय नमः।। प्रदक्षिणनमस्कारान् समर्पयामि।।

बीजाक्षरपूर्वकसूर्यनमस्कारप्रकारः।।

१. ॐ ह्रां उद्यान्नद्य मित्र नमः।। ॐ ह्रां मित्राय नमः।। प्रदक्षिणनमस्कारान् समर्पयामि।।

२. ॐ ह्रीं आरोहन् उत्तरां दिवं।। ॐ ह्रीं रवये नमः।। प्रदक्षिणनमस्कारान् समर्पयामि।।

३. ॐ ह्रूं हृद्रोगं मम सूर्य - ॐ ह्रूं सूर्याय नमः।। प्रदक्षिणनमस्कारान् समर्पयामि।।

४. ॐ ह्रैं हरिमाणं च राशय।। ॐ ह्रैं भानवे नमः।। प्रदक्षिणनमस्कारान् समर्पयामि।।

५. ॐ ह्रौं शुकेषु मे हरिमाणम्।। ॐ ह्रौं खगाय नमः।। प्रदक्षिणनमस्कारान् समर्पयामि।।

६. ॐ ह्रः रोपणका सुदधस्मि।। ॐ ह्रः पूष्णे नमः।। प्रदक्षिणनमस्कारान् समर्पयामि।।

७. ॐ ह्रः अथो हारिद्रवेषु मे।। ॐ ह्रः हिरण्यगर्भाय नमः।। प्रदक्षिणनमस्कारान् समर्पयामि।।

८. ॐ ह्रौं हरिमाणं निदध्मसि।। ॐ ह्रौं मरीचये नमः।। प्रदक्षिणनमस्कारान् समर्पयामि।।

९. ॐ ह्रैं उदगायमादित्यः।। ॐ ह्रैं आदित्याय नमः।। प्रदक्षिणनमस्कारान् समर्पयामि।।

१०. ॐ ह्रूं विश्वेन सहसा सह॥ ॐ ह्रूं सवित्रे नमः॥ प्रदक्षिणनमस्कारान् समर्पयामि॥

११. ॐ ह्रीं द्रिषन्तं मह्यं रन्धयन्॥ ॐ ह्रीं अर्काय नमः॥ प्रदक्षिणनमस्कारान् समर्पयामि॥

१२. ॐ ह्रां ॐ नमो अहं द्रिषते रथं॥ भास्कराय नमः॥ प्रदक्षिणनमस्कारान् समर्पयामि॥

१३. ॐ ह्रां ह्रीं उद्यन्नद्य मित्रमः॥ आरेहन्नुत्तरां दिवं॥ ॐ ह्रां ह्रीं मित्ररविभ्यां नमः॥.
प्रदक्षिणनमस्कारान् समर्पयामि॥

२. ॐ ह्रूं ह्रैं हृद्रोगं मम सूर्य हरिमाणं च नाशय॥

ॐ ह्रूं ह्रैं सूर्यभानुभ्यां नमः॥ प्रदक्षिणनमस्कारान् समर्पयामि॥

३. ॐ ह्रौं ह्रः शुकेषु मे हरिमाणं॥ रोपणाका सुदध्मसि॥

ॐ ह्रैं ह्रः खगपूषभ्या नमः॥ प्रदक्षिणनमस्कारान् समर्पयामि॥

४. ॐ ह्रः अथो हारिद्रवेषु मे॥ उदगादयमादित्यः॥

ॐ ह्रः ह्रौं हिरण्यगर्भमरीचिभ्यां नमः॥ प्रदक्षिणनमस्कारान् समर्पयामि॥

५. ॐ ह्रैं ह्रूं उदगादयमादित्यः॥ विश्वेन सहसा सह॥

ॐ ह्रैं ह्रूं आदित्यसवितृभ्यां नमः॥ प्रदक्षिणनमस्कारान् समर्पयामि॥

६. ॐ ह्रीं ह्रां द्रिषन्तं मह्यें॥ मो अहं द्रिषते रथम्॥

ॐ ह्रीं ह्रां अर्कभास्कराभ्यां नमः॥ प्रदक्षिणनमस्कारान् समर्पयामि॥

७. ॐ ह्रां ह्रीं ह्रैं उद्यन्नद्यामित्रमः॥ आरोहन्नुत्तरां दिवं॥ हृद्रोगं मम सूर्य॥ हरिमाणं च
नाशय॥ ॐ ह्रां ह्रूं ह्रीं ह्रैं मित्ररविसूर्यभानुभ्यो नमः॥ प्रदक्षिणनमस्कारान् समर्पयामि॥

८. ॐ ह्रौं ह्रः ह्रः ह्रौं शुकेषु मे हरिमाणं रोपणका सुदध्मसि।। अक्षो हारिद्रवेषु मे।। हरिमाणं सुदध्मसि।। हरिमाणं निदध्मसि।।

ॐ ह्रौं ह्रः ह्रौं खगपूषहिरण्यगर्भमरीचिभ्यो नमः।। प्रदक्षिणनमस्कारान् समर्पयामि।।

९. ॐ ह्रैं ह्रूं ह्रीं ह्रां उदमादयमादित्यः विश्वेन सहसा सह।। द्विषन्तं मह्यं रन्धयन् मो।। अहं द्विषते रथं।। आदित्यसवितृ अर्कभास्करेभ्यो नमः।। प्रदक्षिणनमस्कारान् समर्पयामि।।

१०. ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः उद्यन्नद्य मित्रमः आरोहन्नुत्तरां दिवं।। हृद्रोगं मम सूर्य हरिमाणं च नाशय।। शुकेषु मे हरिमाणं रोपणका सुदध्मसि।।

ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः मित्र रवि सूर्य भानु खग पूषभ्यो नमः।।

प्रदक्षिणनमस्कारान् समर्पयामि।।

११. ॐ ह्रः ह्रौं ह्रैं ह्रूं ह्रीं ह्रां अथो हरिद्रवेषु मे।। उदगादयमादित्यः।।

विश्वेन सहसा सह द्विषन्तम्।। मह्यं रन्धयन्।। मो अहं द्विषते रथम्।। ॐ ह्रः ह्रौं ह्रैं ह्रूं ह्रीं ह्रां हिरण्यगर्भमरीचादित्य सवितृ अर्क भास्करेभ्यो नमः।। प्रदक्षिणनमस्कारान् समर्पयामि।।

१३. ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ह्रः ह्रौं ह्रैं ह्रूं ह्रीं ह्रां ॐ उद्यन्नद्य मित्रमः।। आरोहन्नुदगुत्तरां दिवम्।। हृद्रोगं मम सूर्य हरिमाणं च नाशय।। शुकेषु मे हरिमाणं रोपणका सुदध्मसि।। अथो हारिद्रवेषु मे हरिमाणं निदध्मसि।। उदगादयमादित्यः।। विश्वेन सहसा सह।। द्विषन्तं मह्यं रन्धयन्।। मो अहं द्विषते रथम्।। ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ह्रः ह्रौं ह्रैं ह्रूं ह्रीं ह्रां मित्र रविसूर्यभानुखग पूष हिरण्यगर्भ मरीचि आदित्य सवितृ अर्क भास्करेभ्यो नमः।। प्रदक्षिणनमस्कारान् समर्पयामि।।

*Ahalyā-Śāpa-Vimochana (wood-carving from Kaviyoor temple)*

## सूर्यनमस्कारारुणमन्त्राः ॥
## (कृष्ण यजुर्वेदीय तैत्तरीयारण्यकान्तर्गताः)

It is customary to recite the Aruṇa-mantras during the Sūrya-namaskāra ritual. The verses are taken from Taittirīya Āraṇyaka of Kṛshṇa Yajurveda; and are ascribed to the Aruṇa Kāndarshis, the sages, who composed them in the forest; hence called Aruna-hymns.

ॐ भद्रं कर्णेभिः श्रुणुयाम देवाः।
भद्रं पश्येमाक्षिभि र्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवंसस्तनूभिः ।
व्यशेमदेवहितं यदायुः॥
स्वास्ति न इन्द्रो वृद्धश्रवाः।
स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्ताक्ष्यों अरिष्टनेमिः ।
स्वस्ति नो बृहस्पतिर्दधातु ॥
ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ भद्रं कर्णेभिःश्रुणुयाम देवाः । भद्रं
पश्येमा - क्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिः।
व्यशेम देवहितं यदायुः॥
स्वास्ति न इन्द्रो वृद्धश्रवाः ।
स्वस्तिः नः पूषा विश्ववेदाः।
स्वस्ति नस्ताक्ष्यों अरिष्टनेमिः।
स्वस्ति नो बृहस्पतीर्दधातु ॥
अपमापामपः सर्वाः। अस्मादस्मादस्मादितो
मुनः ॥ १ ॥

अग्निर्वायुश्च सूर्यश्च ।
सह संचस्करर्धिया।
वाय्वश्वा रश्मिपतयः।
मारीच्याऽत्मानो अद्रुहः ।
देवीभुवनसूवरीः ।
पुत्रवत्त्वाय मे सुत।
महानाम्नीर्महामनाः।
महसो। महसः स्वः ॥
देवीः पर्जन्यसूवरीः।
पूत्रवत्त्वाय मे सुत ॥ २ ॥

अपाश्न्युष्णिमपा रक्षः।
अपाश्न्युष्णिमपारघम्।
अपाघ्रामप चावर्तिम् ॥
अप देवीरितो हित ।
वज्रंदेवीरजीतांगश्च ॥
भुवनं देवसूवरीः।
आदित्यानदितिं देवीम्॥
योनिनोऽर्ध्वमुदीणत। शिवाः न शन्तमा भवन्तु ॥
दिव्या आप ओषधयः ।
सुमृडीका सरस्वति ।
मा ते व्योम सन्दृशि ॥ ३ ॥

स्मृतिः प्रत्यक्षमैतिह्यम् ।
अनुमानश्चतुष्टयम् ।
एतैरादित्यमण्डलम् ।
सर्वैरेव विधास्यते ।
सूर्यो मरीचिमादत्ते ॥
सर्वस्माद् भुवनादाधि ।
तस्याः पाकशेषेण ।
स्मृतं कालविशेषणम् ।
नदीव प्रभवात् काचिदक्षय्यात् स्यन्दते यथा ॥ ४ ॥

तां नद्योऽभि समायन्ति ।
सोरुस्वती न निवर्तते ।
एवं नानासमुत्थानाः ।
कालाः सवंत्सरं श्रिताः ।
अणुशश्च महशश्च सर्वे समवयन्त्रितम् ।
स तैः सर्वैः समाविष्टः ।
ऊरु सन्न निवर्तते ।
अधिसंवत्सरं विद्यात् ।
तदेव लक्षणे ॥ ५ ॥

अणभिश्च महद्भिश्च ।
समारूढः प्रदृश्यते ।
संवत्सरः प्रत्यक्षेण ।
नाधिसत्त्वः प्रदृश्यते ।
पटरो विक्लिधः पिगंः ॥
एतद्वरुणलक्षणम् ।
यत्कृतदुपदृश्यते ।
सहस्त्रं तत्र नीयते ।
एकं हि शिरो नानामुखे कृत्स्नतद्दृतुलक्षणम् ॥ ६ ॥

उभयतः सप्तेन्द्रियाणि ।
जल्पितं त्वेव दिह्यते ।

*Virabhadra with Daksha as Devotee*



*Kapāliśvara, wood-carving Tiruvambāḍi shrine inside the precincts of Padmanābha-svāmi temple, Trivandrum*

शुक्लकृष्णे संवत्सरस्य ।
दक्षिणवामयोः पार्श्वयोः ।
तस्यैषा भवती ।
शुक्रं ते अन्यद्यजतं ते अन्यत् ।
विषुरूपे अहनी द्यौरिवासि ॥
विश्वा हि माया अवसि स्वधावकः
भद्रा ते पूषन्निह रातिरस्त्विति ।
नात्र भुवनम् । न पूषा । न पशवः ।
नादित्यसंवत्सर एव प्रत्यक्षेण
प्रियतमं विद्यात्।
एतद्वै संवत्सरस्य प्रियतमं रूपम् ।
योऽस्य महानर्थ उत्पत्स्यमानो भवति ।
इदं पुण्यं कुरुष्वेति ॥
तमाहरणं तद्यात् ॥ ७ ॥

साकंजानां सप्तथमाहुरेकजम् षडुद्यमा
ऋषयो देवजा इति ।
तेषामिष्टानि विहितानि धामशः ।
स्थात्रे रेजन्ते विकृतानि रूपशः । को नु मर्या
अमिथितः सखा सखायमब्रवीत् ।
जहाको अस्मदीषते ।
यस्तित्याज सखिविदं सखायम् ।
न तस्य वाच्यपि भागो अस्ति ।
यदीं श्रुणोत्यलकं श्रृणोति ॥ ८ ॥

न हि प्र वेद सुकृतस्य पन्थामिति ।
ऋतर्ऋतुना नुद्यमानः।
विननादाभिधावः ।
षष्टिश्च त्रिंशका वल्गाः ।
शुक्लकृष्णौ च षाष्टिकौ ।
सारागवस्त्रैर्जरदक्षः ।
वसन्तो वसुभिः सह ।
संवत्सरस्य सवितुः ।
प्रैषकृत् प्रथमःस्मृतः ।
अमूनानदयतेत्यन्यान् ॥ ९ ॥

अमूंश्च परिरक्षतः ।
एता वाचः प्रयुज्यन्ते ।
यत्रैतदुपदृश्यते ।
एतदेव विजानीयात् ।
प्रमाणं कालपर्यये ।
विशेषणं तु वक्ष्यामः ।

ऋतूनां तन्निबोधत ।

शुक्लवासा रुद्रगणः ।

ग्रीष्मेणावर्तते सह ।

निजहन् पृथिवीं सर्वाम् ॥ १० ॥

ज्योतिषाऽप्रतीख्येन सः ।

विश्वरूपाणि वासांसि ।

आदित्यानां नीबोधत ।

संवत्सरीणं कर्मफलम् ।

वर्षाभिददताम् सह ।

अदुःखो दुःखचक्षुरिव ।

तद्माऽऽपीत इव दृश्यते ।

शीतेनाव्यथयन्निव ।

रुरुदक्ष इव दृश्यते ह्लादयते ज्वलतश्चैव ।

शाम्यतश्चास्य चक्षुषी ।

या वै प्रजा भ्रश्यंन्ते ।

संवत्सरात्ता भ्रंश्यन्ते । याः

प्रतितिष्ठन्ति । संवत्सरे ताः प्रतितिष्ठन्ति ।

वर्षाभ्य इत्यर्थः ॥ ११ ॥

अक्षिदुःखोत्थितस्यैव ।

विप्रसन्ने कनीनिके ।

अङ्क्षी चाद्गणं नास्ति ।

ऋभूणां तन्निबोधत ।

कनकाभानि वासांसि ।

अहतानि निबोधत ।

अन्नमश्नीत मृज्मीत ।

अहं वो जीवनप्रदः ।

एता वाचः प्रयुज्यन्ते ।

शरद्यत्रोपदृश्यते ॥ १२ ॥

अभिधून्वन्तोऽभिघ्नन्त ।

इव वातवन्तो मरुद्गणाः ।

अमुतो जेतुविषुमुखमिव ।

सन्नद्धाःसह ददृशे ह ।

अपध्वस्तैर्वस्ति- वर्णैरिव ।

विशिखासः कपर्दिनः ।

अक्रुद्धस्य योत्स्य-मानस्य क्रुद्धस्येव लोहिनी ।

हेमतश्चक्षुषी विद्यात् ।

अक्ष्णयो क्षिपणोरिव ॥ १३ ॥

दुर्भिक्षं देवलोकेषु ।
मनूनामुदकं गृहे।
एता वाचः प्रवदन्ति।
वैद्युतो यान्ति शैशिरी ः ।
ता अग्निः पवमाना अन्वैक्षत ।
इह जीविकामपरिपश्यन् ।
तस्यैषा भवति ।
इहेह वस्त्वतपसः ।
मरुतःसूर्यत्वचः ।
शर्म सप्रथा आवृणे ॥ १४ ॥

अतिताम्राणि वासांसि ।
अष्टि वज्रि  शतघ्नि च।
विश्वे देवा विप्रहरन्ति।
अग्निजिह्वा असश्चत ।
नैव देवो न मर्त्यः ।
न राजा वरुणो विभुः ।
नाग्निर्नेन्द्रो न पवमानः ।
मातृक्कच्चन विद्यते । दिव्यस्यैका
धनुरार्त्निः पृथिव्यामपरा श्रिता ॥ १५ ॥

तस्येन्द्रो वम्रिरूपेण।
धनुर्ज्यामछिनत्स्वयम् ।
तदिन्द्रधनुरित्यजम् ।
अभ्रवर्णेषु चक्षते ।
एतदेव शं योर्बार्हस्पत्यस्य । एतद्रुद्रस्य धनुः।
रुद्रस्य त्वेव धनुरार्त्निः।
शिर उत्पिपेष ।
स प्रवर्ग्योऽभवत् ।
तस्मा द्यस्सप्रवर्ग्येण यज्ञेन यजते ।
रुद्रस्य स शिरः प्रतिदधाति ।
नैनं रुद्र आरुको भवति ।
य एवं वेद ॥ १६ ॥

अत्यूर्ध्वाक्षोऽतिरश्चात् ।
शिशिरः प्रदृश्यते ।
नैव रूपं न वासांसि ।
न चक्षुः प्रतिदृश्यते ।
अन्योन्यं तु न हिंस्रातः ।
स तस्तद्देवलक्षणम् ।
लोहितोऽक्ष्णि शारशीर्ष्णिः ।
सूर्यस्योदयनं प्रति ।

त्वं करोषि न्यंजलिकाम् ।
त्वं करोषि निजानुकाम् ॥ १७ ॥

निजानुका मे न्यञ्जलिका ।
अमी वाचमुपासतामिति ।
तस्मै सर्वऋतवो नमन्ते ।
मर्यादाकरत्वात्प्र पुरोधाम् ।
ब्राह्मण आप्नोति ।
य एवं वेद ।
स खलु संवथ्सर एतैःसेनानिभिःसह ।
इन्द्राय सर्वान् कामानभिवहति ।
स द्रप्सः । तस्यैषा भवति ॥ १८ ॥

अव द्रप्सो अंशुमतीमतिष्ठत् ।
इयानः कृष्णो दशभिःसहस्रैः ।
आवर्तमिन्द्रःशच्या धमन्तम् ।
अपस्नुहि तं नृमणामथ द्रामिति ।
एतयैवेन्द्रस्सलावृक्या सह।
असुरान् परिवृश्चति ।
पृथिव्यंशुमती । तावन्ववस्थितः
सवंथ्सरो दिवं च ।

नैवं विदुषाऽऽचार्यान्ते वासिनौ ।
अन्योन्यस्मै द्रुह्याताम् ।
यो द्रुह्यति । भ्रश्यते स्वर्गाल्लोकात् ।
इत्यृतुमण्डलानि ।
सूर्यमण्डलान्या ख्यायिकाः ।
अत ऊर्ध्वं सनिर्वचनाः ॥ १९ ॥

आरोगो भ्राजः पटरः पतङ्गः ।
स्वर्णरोज्योतिषीमान् विभासः ।
ते अस्मै सर्वे दिवमातपन्ति ।
ऊर्जं दुहानां अनपस्फुरन्त इति ।
कश्यपोऽ ष्टमः ।
स महामेरुं न जहाति ।
तस्यै भवति ।
यत्ते शिल्पं कश्यप रोचनावत् ।
इन्द्रियावत्पुष्कलं चित्रभानु ।
यस्मिन्थ्सूर्या अर्पिताः सप्त साकम् ॥ २० ॥

तस्मिन् राजानमधि विश्रयेममिति ।
ते अस्मै सर्वे कश्यपाज्ज्योतिर्लभन्ते ।
प्राणो जीवानीन्द्रियजीवानि ।

भ्रस्ताकर्मकृदिवैवम् ।
प्राणो जीवानीन्द्रियजीवानि ।
सप्तशीर्षण्याः प्राणाः ।
सूर्या इत्याचार्याः ।
अपश्य महमेतान्थ्सप्त सूर्यानिति ।
पञ्चकर्णो वाथ्स्यायनः ।
सप्तकर्णश्च प्लाक्षिः ॥ २१ ॥

अनुश्रविक एव नौ कश्यप इति ।
उभौ वेदयिते ।
न हि शेकुमिव महामेरुं गन्तम् ।
खपश्यमहमेतथ्सूर्य मण्डलं परिवर्तमानम् ।
गार्ग्यः प्राणत्रातः ।
गच्छन्त महामेरुम् ।
एकं चाजहतम् ।
भ्राजपटरपतङ्गा निहने ।
तिष्ठन्नातपन्ति ।
तस्मादिह तप्त्रितपाः ॥ २२ ॥
अमुत्रेतरे । तस्मादिहातप्त्रि तपाः ।
तेषामेषा भवति ।
सप्त सूर्या दिवमनुप्रविष्टाः ।

तानन्वेति पथिभिर्दक्षिणावान् ।
ते अस्मै सर्वे घृतमातपन्ति ।
ऊर्जं दुहाना अनपस्फुरन्त इति ।
सप्तर्त्विजसूर्या इत्याचार्याः ।
तेषा मेषा भवति ।
सप्तदिशो नानासूर्याः ॥ २३ ॥

सप्तहोतार ऋत्विजः ।
देवा आदित्या ये सप्त ।
तेभिः सोमाभी रक्षण इति ।
तदप्याम्नायः ।
दिग्भ्राज ऋतून्करोति ।
एतयैवावृताऽऽसहस्रसूर्यताया इति वैशंपायनः ।
तस्यैषा भवति ।
यद्याव इन्द्र ते शतं शतं भूमिः ।
उत स्युः । न त्वा वज्रिन्थ्सहस्रं सूर्या ः ॥ २४ ॥

अनु न जातमष्टरोदसी इति ।
नानालिङ्गत्वादृतूनां नाना सूर्यत्वम् ।
कष्टौ तु व्यवसिता इति ।
सूर्यमण्डलान्यष्टात ऊर्ध्वम् ।

*Brahma*

तेषामेषा भवति ।
चित्रं देवानामुदगादनीकम् ।
चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आऽप्रा द्यावापृथिवी अन्तरिक्षम् ।
सूर्य आत्मा जगतस्तस्थुषश्चेति ॥ २५ ॥

क्वेदमभ्रं निविशते ।
क्वायं संवथ्सरो मिथः
क्वाहः क्वेयं देवरात्री ।
क्व मासा ऋतवःश्रिताः ।
अर्धमासा मुहूर्ताः ।
निमेषास्तुटिभिः सह ।
क्वेमा आपो निविशन्ते ।
यदीतो यान्ति सम्प्रति ।
काला अप्सु निविशन्ते ॥
आपः सूर्ये समाहिताः ॥ २६ ॥

अभ्राण्यपः प्रपद्यन्ते ।
विद्युथ्सूर्ये समाहिताः ।
अनवर्णे इमे भूमी ।
इयं चासौ च रोदसि।

किं स्विदत्रान्तरा भूतम् ।
येनेमे विधृते उभे विष्णुना विधृते भूमी ।
इति वथ्सस्य वेदना ।
इरावती धेनुमती हि भूतम् ।
सूयवसिनी मनुषे दशस्ये ॥ २७ ॥

व्यष्टभ्नाद्रोदसी विष्णवेते ।
दाधर्थ पृथिवीमभितो मयूखैः ।
किं तद्विष्णोर्बलमाहुः ।
का दिप्तिः किं परायणम् ।
एको यद्धारयद्देवाः ।
रेजती रोदसी उभे ।
वाताद्विष्णोर्बलमाहुः ।
अक्षराद्दीप्तिरुच्यते ।
त्रिपदाद्धारयद्देवः ।
यद्विष्णोरेकमुत्तमम् ॥ २८ ॥

अग्नयो वायवश्चैव ।
एतदस्य परायणम् ।
पृच्छामित्वा परं मृत्युम् ।
अवमं मध्यमं चतुम् ।

लोकं च पुण्यपापानाम् ।
एतत् पृच्छामि सम्प्रति ।
अमुमाहुः परं मृत्युम् ।
पवमानं तु मध्यमम् ।
अग्निरेवावमो मृत्युः ।
चन्द्रमाश्चतुरुच्यते ॥ २९ ॥

अनाभोगाः परं मृत्युम् ।
पापाः संयन्ति सर्वदा।
आभोगास्त्वेव संयन्ति।
यत्र पुण्यकृतो जनाः।
ततो मध्यममायन्ति।
चतुर्मग्निं च सम्प्रति।
पृच्छामि त्वा पापकृतः।
यत्र यातयते यमः।
त्वं नस्तद् ब्रह्मन् प्रब्रूहि।
यदि वेत्स्था सतो गृहान्॥३०॥

कश्यपादुदिताः सूर्याः।
पापान्निर्घ्नन्ति सर्वदा।
रोदस्योरन्तर्देशेषु।
तत्र न्यस्यन्ते वासवैः।
तेऽशरीराः कश्यपः पश्यको भवति।
यथ्सर्वं परिपश्यतीति सौक्ष्म्यात्।
अथाग्नेरष्टपुरुषस्य ।
तस्यैषा भवति।
अग्ने नय सुपथा राये अस्मान्।
विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मज्जुहुराणमेनो।
भूयिष्ठां ते नम उक्तिं विधेम ॥३३॥

अग्निश्च जातवेदाश्च ।
सहोजा अजिराप्रभुः।
वैश्वानरो नर्यापाश्च।
पंक्तिराधाश्च सप्तमः।
विसर्पेवाष्टमोग्नीनाम्।
एतेऽष्टौ वसवः क्षिता इति।
यथर्त्वेवाग्नेरर्चिर्वर्णविशेषाः।
नीलार्चिश्च पीतकार्चिश्चेति।
अथ वायोरेकादशपुरुषस्यैकादशस्त्रीकस्य।
प्रभ्राजमाना व्यवदाताः॥३४॥

याश्च वासुकिवैद्युताः।
रजताः परुषाः श्यामाः।
कपिला अतिलोहिताः।
ऊर्ध्वा अवपतन्ताश्च।
वैद्युतइत्येकादश।
नैनं वैद्युतो हिनस्ति। य एवं वेद।
स होवाच व्यासः पाराशर्यः ।
विद्युद्वधमेवाहं मृत्युमैच्छमिति।
न त्वकामं हन्ति।।३५।।

य एवं वेद। अथ गन्धर्वगणाः। स्वान भ्राट्।
अंघारिर्बंभारिः। हस्तः सुहस्तः।
कृशानुर्विश्वावसुः।
मूर्धन्वान्थ्सूर्यवर्चाः।
कृतिरित्येकादश गन्ध्र्वगणाः।
देवाश्च महादेवाः।
रश्मयश्च देवागरगिरः।।३६।।

नैनं गरो हिनस्ति।
य एवं वेद।
गौरीमिमाय सलिलानि तक्षती एकपदी द्विपदी।
सा चतुष्पदी।
अष्टापदी नवपदी बभूवुषी। सहस्राक्षरा परमे
व्योमन्निति। वाचो विशेषणम्। अथ
निगदव्याख्याताः। ताननुक्रमिष्यामः।
वराहवस्त्वतपसः।।३७।।

विद्युन्महसो धूपयः। श्वापयो गृहमेधाश्चेत्येते।
ये चेमेऽशिमिविद्विषः। पर्जन्याः सप्त
पृथिवीमभिवर्षन्ति। वृष्टिभिरिति। एतयैव
विभक्तिविपरीताः। सप्तभिर्वातैरुदीताः। अमून्
लोकानभि वर्षन्ति। तेषामेषा भवति।
समानमेतदुदकम्।।३५।।

उच्चैत्यव चाहभिः। भूमिं पर्जन्या जिन्वन्ति।
दिवं जिन्वन्त्यग्नय इति। यदक्षरं भूतकृतम्। विश्वे
देवा उपासते। महर्षिमस्य गोप्तारम्।
जमदग्निमकुर्वत । जमदग्निराप्यायते।
छन्दोभिश्चतुरुत्तरैः। राज्ञः सोमस्य तृप्तासः।।३९।।

ब्रह्मणा वीर्यावता। शिवा नः प्रदिशो दिशः।
तच्छंयोरावृणीमहे। गातुं यज्ञाय । गातुं यज्ञपतये।
दैवी स्वस्तिरस्तु नः। स्वस्तिर्मानुषेभ्यः।

ऊर्ध्वं जिगातु भेषजम्। शं नो अस्तु द्विपदे।
शं चतुष्पदे। सोमपा असोमपा इति
निगदव्याख्याताः॥४०॥

सहस्रवृदियं भूमिः। परं व्योम सहस्रवृत्।
आश्विना भुज्यू नासत्या। विश्वस्य जगतस्पती।
जाया भूमिः पतिर्व्योम। मिथुनं ता अतुर्यथुः।
पुत्रो बृहस्पती रुद्रः सरमा इति स्त्रीपुमम्।
शुक्रंवामन्यद्यजतं वामन्यत्। विषुरूपे अहनी द्यौरिव
स्थः॥४१॥

विश्वा हि माया अवथः स्वधावन्तौ। भद्रा वां
पूषणाविह रातिरस्तु। वासात्यौ चित्रौ जगतो निधानौ।
द्यावाभूमी चरथःस्वं सखायौ।
तावाश्विनौ रासभाश्वाहव मे शुभस्पती अगतं सूर्यया
सह। त्युग्रौ ह भुज्युमश्विनोदमेघे।
रयिं न कश्चिन्ममृवाः अवाहाः। तमूहथुना
भिरात्मन्वतीभिः। अन्तरिक्ष पृड्भिरपोद
काभिः॥४३॥

तिस्रः क्षपस्त्रिरहाऽतिव्रजद्भिः। नासत्या भुज्युमूहथुः
पतङ्गैः । समुद्रस्य धन्वन्नार्द्रस्य पारे।
त्रिभिरथैश्वपद्भिःषडश्वैः । सवितारं वितन्वन्तं ।
अनु बध्नाति शाम्बरः। आपपूर्षम्बरश्चैव।
सविताऽरेपसोऽ भवत्। त्यं सुतृप्तं विदित्वैव।
बहुसोमगिरिं वशी॥४३॥

अन्वेति तुग्रोऽवक्रियान्तम्। आयसूयन्थ्सोमतृप्सुषु।
स संग्रामस्तमो द्योऽत्योतः। वाचोगाः पिपाति
तत्। स तद्गोभिःस्तवात्येत्यन्ये। रक्षसाऽनन्विताश्च
ये। अन्वेति परिवृत्त्याऽस्तः। एकमेतौ स्थो अश्विना।
ते एते द्युःपृथिव्योः। अहरहर्गर्भं दधाथे॥४४॥
तयोरेतौ वत्सावहोरात्रे । पृथिव्या अहः।
दिवो रात्रिः। ता अविसृष्टौ। दम्पती एव
भवतः। तयोरेतौ वत्सौ। अग्निश्चादित्यश्च ।
रात्रेर्वत्सः। श्वेत आदित्यः। अह्नोऽग्निः॥४५॥

ताम्रो अरुणः। अविसृष्टौ। दम्पती एव भवतः।
तयोरेतौ वत्सौ। वृत्रश्च वैद्युतश्च। अग्ने वृत्रः।
वैद्युत आदित्यस्य। ता अविसृष्टौ। दम्पती एव
भवतः। तयोरेतौ वत्सौ॥४६॥

उष्मा च नीहारश्च। वृत्रस्योष्मा।
वैद्युतस्य नीहारः। तौ तावेव प्रतिपद्येते।



*Gaṇeśa with Devotee wood-carving, Ātmanātha-svāmi temple, Avaḍayār-Koil*

सेऽयं रात्री गर्भिणी पुत्रेण संवसति। तस्या वा एतदुल्बणम्। यद्रात्रौ रश्मयः। यथा गोर्गर्भिण्या उल्बणम्। एवमेतस्या उल्बणम्। प्रजयिष्णुः प्रजया च पशुभिश्च भवति। य एवं वेद। एतमुद्यन्तमपियन्तं चेति। आदित्यः पुण्यस्य वत्सः। अथः पवित्राङ्गिरसः।।४७।।

पवित्रवन्तः परि वाजमासते। पितैषां प्रत्नो अभिरक्षति व्रतम्। महः समुद्रं वरुणस्तिरोदधेः। धीरा इच्छेकुर्धरुणेष्वारभम्। पवित्रं ते विततं ब्रह्मणस्पते। प्रभुर्गात्राणि पर्येषि विश्वतः। अतप्ततनूर्न तदामो अश्नुते। श्रृतास इद्वहन्तथ्समाशत। ब्रह्मा देवानाम्। असतः सद्ये ततक्षुः।। ४५।।

ऋषयः सप्तात्रिश्च यत्। सर्वेऽत्रयो अगस्त्यश्च। नक्षत्रैश्चावृतोऽवसन्। अथ सावितुः श्यावश्वस्यार्तिकामस्य। अमी य ऋक्षा निहितास उच्चा। नक्तं ददृश्रे कुहचिद्दिवेयुः। अदब्धानि वरुणस्य व्रतानि। विचाराच्चन्द्रमा नक्षत्रमेति। तथ्सवितुर्वरेण्यं। भर्गो देवस्य धीमहि।।४९।।

धियो यो नः प्रचोदयात्। तथ्सवितुर्वृणी महे। वयं देवस्य भोजनम्। श्रेष्ठं सर्व धातमम्। तुरं भगस्य धीमहि। अपागूहत सविता तृभीन्। सर्वा दिवू अन्दसः। नक्तं तान्यभवन्दृशे। अस्थ्यस्रा संभविष्यामः। नाम नामैव नाम मे।।५०।।

नपुंसकं पुमांस्त्र्यसि। स्थावरोऽस्म्यथ जङ्गमः। यजेऽयक्षि यष्टाहे च। मया भूतान्ययक्षत। पशवू मम भूतानि। अनूबन्ध्योऽस्म्यहं विभुः। स्त्रियः सतीः ता उ मे क्षणवान्न आहुः। पश्यदक्षण्वान्न विचेतदन्धः। कविर्यः पुत्राय इमा चिकेत।।५१।।

यस्ता विजानाथ्सवितुः पिताऽसत्। अन्धो मणिमविन्दत्। तमनंगुलिरावयत्। अग्रीवः प्रत्यमुञ्चत्। तमजिह्वा असश्चत। ऊर्ध्वमूलमवाक्शाखम्। वृक्षं यो वेद संप्रति। न स जातु जनः श्रद्दध्यात्। मृत्युर्मा मारयादितिः। हसितं रुदितं गीतम्।।५२।।

वीणा पणवलासितम्। मृतं जीवं च यत्किञ्चित्। अंगानि स्नेव विद्धि तत्।

अतृष्यं सृष्यद्ध्यायत्। अस्माज्जाता मे मिथू चरन्।
पुत्रो निर्ऋत्या वैदेहः। अचेता यश्च चेतनः। स तं
मणिमविन्दत्। सोऽनंगुलिरावयत्। सोऽग्रीवः
प्रत्यमुञ्चत् ॥५३॥

सोऽजिह्वो असश्चत ।
नैतमृषिं विदित्वा नगरं प्रविशेत्।
यदि प्रविशेत्। मिथौ चरित्वा प्रविशेत्।
तत्संभवस्य व्रतम्। आ तमग्ने रथं तिष्ठ।
एकश्वमेकयोजनम्। एकचक्रमेकधुरम्। वातध्राजिगातिं
विभो। न रिष्यति न व्यथते॥५४॥

नास्याक्षो यातु सज्जति। यञ्छ्वेतान् रोहितं
श्चाग्रेः । रथे युक्तवाऽधितिष्ठति। एकया च दशभिश्च
स्वभूते। द्वाभ्यामिष्टये विंशत्या च। तिसृभिश्च
वहसे त्रिंशता च। नियुद्भिर्वायविह ता विमुञ्च॥५५॥

आ तनुष्व प्र तनुष्व। उद्धमाधम संधम। आदित्ये
चन्द्रवर्णानाम्। गर्भमाधेहि यः पुमान्।
इतः सिक्तं सूर्यगतम्। चन्द्रमसे रसं कृधि।
वारादं जनयाऽ ग्रेऽग्निम्। य एको रुद्र उच्यते।
असंख्याताः सहस्त्राणि स्मर्यते न च
दृश्यते॥५६॥

एवमेतं निबोधत। आ मन्द्रैरिन्द्र हरिभिः।
याहि मयूररोमभिः। मा त्वा केचिन्नियेमुरिन्न पाशिनः
दधन्वेव तां इहि। मा मन्द्रैरिन्द्र हरिभिः। यामि
मयूररोमभिः मा मा केचिनी ये मुरिन्न पाशिनः।
निधन्वेव ताभ्इमि। अणुभिश्च महद्भिश्च॥५७॥

निघृष्वैरसमायुतैः। कालैर्हरित्वमापन्नैः।
इन्द्राऽयाहि सहस्त्रयुक्। अग्निर्विभ्राष्टिवसनः।
वायुःश्वेत सिकद्रुकः। संवथ्सरो विषूवर्णैः
नित्यास्तेनुचरीस्तव। सुब्रह्मण्यों सुब्रह्मण्यों
सुब्रह्मण्योम्॥ इन्द्राऽगच्छ हरिव आगच्छ। मेष
वृषणश्वस्य॥५५॥

गौरावस्कन्दिन्नहल्यायै जौर। कौशिकब्राह्मण गौतम
ब्रुवाण। अरुणाश्वा इहागताः। वसवः पृथिविक्षितः।
अष्टौ दिग्वाससोऽग्नयः। अग्निश्च जातवेदाश्चेत्येते।
ताम्राश्वास्ताम्ररथाः। ताम्रवर्णास्तथाऽसिता।
दण्डहस्ताः खादग्दतः। इतो रुद्राः परां
गताः॥५९॥

उक्तं स्थानं प्रमाणं च पुर इत बृहस्पतिश्च
सविता च । विश्वरूपैरिहागतम्। रथेनोदकवर्त्मना।

अप्सुषा इति तद्द्वयोः। उक्तो मेषो वासांसि च।
कालावयवानामितः प्रतीज्या। वासात्या इत्यश्विनोः।
कोऽन्तरिक्षे शब्दं करोतीति। वासिष्ठो रौहिणो
मीमांसां चक्रे। तस्यैषा भवति। वाश्रेव विद्युदिति।
ब्रह्मण उदरणमसि। ब्रह्मण उदीरणमसि। ब्रह्मण
आस्तरणमसि। ब्रह्मण उपस्तरणमसि॥६०॥

(अपक्रामत गर्भिण्यः)। अष्टयोनीमष्टपुत्राम्।
अष्टपत्नीमिमां महीम्। अहं वेद न मे मृत्युः।
न चामृत्युरघाऽऽहरत्। अष्टयोन्यष्टपुत्रम्।
अष्टपतिदमन्तरिक्षम्। अहं वेद न मे मृत्युः।
न चामृत्युरघाऽऽहरत्। अष्टयोनीमष्ट
पुत्राम्॥६१॥
अष्टपत्नीममूं दिवम्। अहं वेद न मे मृत्युः।
न चामृत्युरघाऽऽहरत्। सुत्रामाणं महीमूषु।
अदितिर्द्यौरदितिरन्तरिक्षम्। अदितिर्माता स
पिता स पुत्रः।
विश्वे देवा अदितिः पञ्चजनाः।
अदितिर्जातमदितिर्जनित्वम्।
अष्टा पुत्रासो अदितेः। ये जातास्तन्वः परि
देवा उपप्रैत्सप्तभिः॥६२॥

परा मार्ताण्डमास्यत्। सप्तभिः पुत्रैरदितिः।
उपप्रैत्पूर्व्यं युगम्। प्रजायै मृत्यवे तत्।
परा मार्तण्डमाभरदिति। ताननुक्रमिष्यामः। मित्रश्च
वरुणश्च। धाता चार्यमा च। अंशश्च भगश्च। इन्द्रश्च
विवस्वांश्चेत्येते। हिरण्यगर्भो हंसः शुचिषत्। ब्रह्म
जज्ञानं तदित्पदमिति। गर्भः प्राजापत्यः। अथ
पुरुषः सप्तपुरुषः॥ ६३॥

(यथा स्थानं गर्भिण्यः)। योऽसौ तपन्नुदेति।
स सर्वेषां भूतानां प्राणानादायेदिति।
मा मे प्रजाया मा पशूनाम्।
मा मम प्राणानादायोदगाः।
असौ योऽस्तमेति।
स सर्वेषां भूतानां प्राणानादायास्तमेति।
मा मे प्रजाया मा पशूनाम्।
या मम प्राणानादयास्तंगाः असौ य आपूर्यति।
स सर्वेषां भूतानां प्राणैरापूर्यति॥६४॥

मा मे प्रजाया मा पशूनाम्।
मा मम प्राणैरापूरिष्ठाः। असौ योऽपक्षीयति।
स सर्वेषां भूतानां प्राणैरपक्षीयति।

मा मे प्रजाया मा पशूनाम्।
मा मम प्राणैरपक्षेष्ठाः।
अमूनि नक्षत्राणि। सर्वेषां भूतानां प्राणैरप
प्रसर्पन्ति चोत्सर्पन्ति च।
मा मे प्रजाया मा पशूनाम्।
मा मम प्राणैरप प्रसृपत मोत्सृपत।। ६५।।

इमे मासाश्चार्धमासाश्च।
सर्वेषां भूतानां प्राणैरप प्रसर्पन्ति चोत्सर्पन्ति च।
मा मे प्रजाया मा पशूनाम्।
मा मम प्राणैरप प्रसृपत मोत्सृपत।
इम ऋतवः। सर्वेषां भूतानां प्राणैरप प्रसर्पन्ति
चोत्सर्पन्ति च।
मा मे प्रजाया मा पशूनाम्।
मा मम प्राणैरप प्रसृपत मोत्सृपत।
अयं संवथ्सरः। सर्वेषां भूतानां प्राणैरप प्रसर्पति
चोत्सर्पति च।। ६६।।

मा मे प्रजाया मा पशूनाम्।
मा मम प्राणैरप प्रसृप मोत्सृप। इदमहः।
सर्वेषां भूतानां प्राणैरप प्रसर्पति चोत्सर्पति च।
मा मे प्रजाया मा पशूनाम्।
मा मम प्राणैरप प्रसृप मोत्सृप। इयं रात्रिः।
सर्वेषां भूतानां प्राणैरप प्रसर्पति चोत्सर्पति च।
मा मे प्रजाया मा पशूनाम्।
मा मम प्राणैरप प्रसृप मोत्सृप।
ॐ भूर्भुवःस्वः। एतद्वो मिथुनं मा नो मिथुनं
रीढ्वम्।।६७।।

अथादित्यस्याष्टपुरुषस्य।
मसूनामादित्यानां स्थाने स्वतेजसा भानि।
रुद्राणामादित्यानां स्थाने स्वतेजसा भानि।
आदित्यानामादित्यानां स्थाने स्वतेजसा भानि।
सतां सत्यानां। आदित्यानां स्थाने
स्वतेजसा भानि।
अभिथून्वतामभिघ्नताम्। वातवतां
मरुताम्।
आदित्यानां स्थाने स्वतेजसा भानि।
ऋभूणामादित्यानां स्थाने स्वतेजसा भानि।
विश्वेषां देवानाम्। आदित्यानां स्थाने स्वतेजसा
भानि।



*An episode from Rāmāyaṇa (wood-carving, Kaviyoor temple)*

विश्वेषां देवानाम्। आदित्यानां स्थाने स्वतेजसा भानि।

संवथ्सरस्य सवितुः। आदित्यस्य स्थाने स्वतेजसा भानि।

ॐ भूर्भुवः स्वः। रश्मयो वो मिथुनं मा नो मिथुनं रीढ्वम्।। ६५।।

अरोगस्य स्थाने स्वतेजसा भानि।

भ्राजस्य स्थाने स्वतेजसा भानि।

पटरस्य स्थाने स्वतेजसा भानि।

पतङ्गस्य स्थाने स्वतेजसा भानि स्वर्णरस्य स्थाने स्वतेजसा भानि।

ज्यातिहीमतस्य स्थाने स्वतेजसा भानि।

विभासस्य स्थाने स्वतेजसा भानि।

कश्यपस्य स्थाने स्वतेजसा भानि।

ॐ भूर्भुवः स्वः। आपो वो मिथुनं मा नो मिथुनं रीढ्वम्।।६९।।

अथ वायोरेकादशपुरुषस्यैकादशस्त्रीकस्य।

प्रभ्राजमानानां रुद्राणां स्थाने स्वतेजसा भानि!

व्यवदातानां रुद्राणां स्थाने स्वतेजसा भामि वासुकिवैद्युतानां रुद्राणां स्थाने स्वतेजसा भानि।

रजतानां रुद्राणां स्थाने स्वतेजसा भानि।

परुषाणां स्थाने स्वतेजसा भानि।

श्यामानां रुद्राणां स्थाने स्वतेजसा भानि।

कपिलानां रुद्राणां स्थाने स्वतेजसा भानि।

अतिलोहितानां रुद्राणां स्थाने स्वतेजसा भानि।

ऊर्ध्वानां रुद्राणां स्थाने स्वतेजसा भानि।।७०।।

अवपतन्तानां रुद्राणां स्थाने स्वतेजसा भानि।

वैद्युतानां रुद्राणां स्थाने स्वतेजसा भानि।

प्रभ्राजमानीनां रुद्राणीनां स्थाने स्वतेजसा भानि।

व्यवदातीनां रुद्राणीनां स्थाने स्वतेजसा भानि।

वासुकिवैद्युतीनां रुद्राणीनां स्थाने स्वतेजसा भानि।

परुषाणानां रुद्राणीनां स्थाने स्वतेजसा भानि।

श्यामानां रुद्राणीनां स्थाने स्वतेजसा भानि।

कपिलानां रुद्राणीनां स्थाने स्वतेजसा भानि।

अतिलोहितीनां रुद्राणीनां स्थाने स्वतेजसा भानि।

ऊर्ध्वानां रुद्राणीनां स्थाने स्वतेजसा भानि।

अबपतन्तीनां रुद्राणीनां स्थाने स्वतेजसा भानि।

वैद्युतीनां रुद्राणीनां स्थाने स्वतेजसा भानि।

ॐ भूर्भुवः स्वः।

रूपाणि वो मिथुनं मा नो मिथुनं
रीढ्वम्।।७१।।

अथाग्नेरष्टपुरुषस्य । अग्नेः पूर्वदिश्यस्य
स्थाने स्वतेजसा भानि।

जातवेदस उपदिश्यस्य स्थाने स्वतेजसा
भानि।

सहोजसो दक्षिणादिश्यस्य स्थाने स्वतेजसा
भानि।

अजिराप्रभव उपदिश्यस्य स्थाने स्वतेजसा
भानि।

वैश्वानरस्या परदिश्यस्य स्थाने स्वतेजसा
भानि।

नर्यापस उपदिश्यस्य स्थाने स्वतेजसा भानि।

पंक्तिराधस उदग्दिश्यस्य स्थाने स्वतेजसा
भानि।

विसर्पिण उपदिश्यस्य स्थाने स्वतेजसा
भानि।

ॐ भूर्भुवः स्वः। दिशो वो मिथुनं मानो
मिथुनं रीढ्वम्।। ७३।।

दक्षिणपूर्वस्थां दिशि विसर्पी नरकः।

तस्मान्नः परिपाहि।

दक्षिणपूर्वस्थां दिशि अविसर्पी नरकः।

तस्मान्नः परिपाहि।

उत्तरपूर्वस्यां दिशि विषादी नरकः।

तस्मान्नः परिपाहि। उत्तरापरस्यां दिश्यविषादी
नरकः।

तस्मान्नः परिपाहि। आ यस्मिन्थ्सप्तवासवा
इन्द्रियाणि। शतक्रतवित्येते ।।७३।।

इन्द्रघोषा वो वसुभिः पुरस्ता
दुपदधताम्। मनोजवसो वः पितुभिर्दक्षिणत
उपदधताम्।

प्रचेता वो रुद्रैः पश्चादुपदधताम्।

विश्वकर्मा व आदित्यैरुत्तरत उपदधताम्।

त्वष्टा वो रूपैरुपरिष्टादुयदधताम्। संज्ञानं वः
पश्चादिति।

आदित्यः सर्वोऽग्निः पृथिव्याम्।
वायुरन्तरिक्षे । सूर्यो दिवि। चन्द्रमा दिक्षु।
नक्षत्राणि स्वर्लोके एवा ह्येव।
एवाह्यग्ने। एवा हि वायो। एवा हीन्द्र।
एवा हि पूषन्। एवा हि देवाः ॥७४॥

अपामापामपःसर्वाः॥
अस्मादस्मादितोऽमुतः। अग्निर्वायुश्च सूर्यश्च।
सह सञ्चस्करर्धिया। वाय्वश्वा रश्मिपतयः।
मरीच्यात्मानो अदुहः। देवीर्भुवनसूवरीः।
पुत्रवत्त्वाय मे सुत। महानाम्नीर्महामनाः।
महसो महसः स्वः॥७५॥

देवीः पर्जन्यसूवरीः पुत्रवत्त्वाय मे सुत।
अपाश्र्युष्णिमपा रक्षः। अपाश्र्युष्णिमपा रघम्।
अपाघ्रमप चावर्तिम्। अप देवीरितो हित।
वज्रं देवीरजीतांश्च। भुवनं देवसूवरीः।
आदित्यानदितिं देवीम् ।
योनिनोर्ध्वमुदीषत॥७६॥

भद्रं कर्णेभिःश्रृणुयाम देवाः। भद्रं
पश्येमाक्षभिर्यजत्राः।
स्थिरैरंगैस्तुष्टुवांसस्तनूभिः।
व्यशेम देवहितं यदायुः॥
स्वस्ति न इन्द्रो वृद्धश्रवाः।
स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः।
स्वस्ति नो बृहस्पतिर्दधातु॥
केतवो अरुणासश्च। ऋषयो वातरशनाः।
प्रतिष्ठां शतधा हि। समाहितासो
सहस्त्रधायसम्।
शिवा नः शंतमा भवन्तु ।
दिव्या आप ओषधयः।
सुमृडीका सरस्वति मा ते व्योम
संदृशि॥७७॥

योऽपां पुष्पं वेद। पुष्पवान् प्रजावान् पशुमान्
भवति।
चन्द्रमा वा अपां पुष्पम्। पुष्पवान् प्रजावान्
पशुमान् भवति।
य एवं वेद। योऽपामायतनं वेद।
आयतनवान् भवति॥ अग्निर्वा अपामायतनम्।
आयतनवान् भवति।

योऽग्नेरायतनं वेद ॥७८॥

आयतनवान् भवति। आपो वा अग्नेरायतनम्। आयतनवान् भवति।

य एवं वेद। योऽपामायतनं वेद आयतनवान् भवति॥

वायुर्वा अपामायतनम्। आयतनवान् भवति॥

यो वायोरायतनं वेद। आयतनवान् भवति॥७९॥

आपो वै वायोरायतनम्। आयतनवान् भवति।

य एवं वेद। योऽपामायतनं वेद।

आयतनवान् भवति। असौ वै तपन्नपामायतनं।

आयतनवान् भवति।

योऽमुष्य तपत आयतनं वेद। आयतनवान् भवति॥८०॥

आयतनवान् भवति। य एवं वेद।

योऽपामायतनं वेद। आयतनवान् भवति।

चन्द्रमा वा आपामायतनम्।

आयतनवान् भवति। यश्चन्द्रमस आयतनं वेद।

आयतनवान् भवति।

आपो वै चन्द्रमस आयतनम्।

आयतनवान् भवति॥८१॥

य एवं वेद। योऽपामायतनं वेद।

आयतनवान् भवति। नक्षत्राणि वा

अपामायतनं। आयतनवान् भवति।

यो नक्षत्राणामायतनं वेद। आयतनवान् भवति।

आपो वै नक्षत्राणामायतनम्। आयतनवान् भवति।

य एवं वेद॥८२॥

योऽपामायतनं वेद।

आयतनवान् भवति। पर्जन्यो वा

अपामायतनम्। आयतनवान् भवति। यः

पर्जन्यस्यायतनं वेद। आयतनवान् भवति।

आपो वै पर्जन्यस्यायतनम्। आयतनवान् भवति। य एवं वेदा। योऽपामायतनं वेद॥८३॥

आयतनवान् भवति। संवथ्सरो वा

अपामायतनम् आयतनवान् भवति।

यः संवंथ्संरस्यायतनं वेद। आयतनवान् भवति।



*Subrahmanya as Killer of Tāraka (with gods adoring the hero) from Chidambaram*

आपो वै संवथ्सरस्यायतनम्। आयतनवान्
भवति। य एवं वेद । योऽप्सु नावं प्रतिष्ठितां
वेद। प्रत्येव तिष्ठति॥८४॥

इमे वै लोका अप्सु प्रतिष्ठिताः।
तदेषाभ्यनूक्ता । अपां रसमुदयं सन्।
सूर्ये शुक्रं समाभृतम्।
अपां रसस्य यो रसः ।
तं वो गृह्णाम्युत्तममिति।
इमे वै लोका अपां रसः। ते ऽमुष्मिन्नादित्ये
समाभृताः।
जानुदघ्नीमुत्तरवेदीं खात्वा।
अपां पूरयित्वा गुल्फदघ्नम्॥८५॥

पुष्करपर्णैः पुष्करदण्डैः पुष्करैश्च संस्तीर्य।
तस्मिन्विहायसं। अग्निं प्रणीयोपसमाधाय ।
ब्रह्मवादिनो वदन्ति।
कस्मात्प्रणीतेऽयमग्निश्चीयते। साप्रणीतेऽयमप्सु
ह्ययं चीयते। असौ भुवनेऽप्यनाहिताग्निरेताः।
तमभित एता अभीष्टका उपदधाति। अग्निहोत्रे
दर्शपूर्णमासयोः।
पशुबन्धे चातुर्मास्येषु॥८६॥

अथो आहुः। सर्वेषु यज्ञक्रतुष्विति। एतद्ध स्म
वा आहुः शण्डिलाः कमग्निं
चिनुते। सत्रियमग्निं चिन्वानः। संवथ्सरं
प्रत्यक्षेण। कमग्निं चिनुते। सावित्रमग्निं
चिन्वानः। अमुमादित्यं प्रत्यक्षेण। कमग्निं
चिनुते॥८७॥
नाचिकेतमग्निं चिन्वानः।
प्राणान् प्रत्यक्षेण। कमग्निं चिनुते।
चातुर्होत्रियमग्निं चिन्वानः।
ब्रह्म प्रत्यक्षेण। कमग्निं चिनुते।
वैश्वसृजमग्निं चिन्वानः।
शरीरं प्रत्यक्षेण। कमग्निं चिनुते।
उपानुवाक्यमाशुमाग्निं चिन्वानः॥८८॥

इमान् लोकान् प्रत्यक्षेण। कमग्निं चिनुते।
इमामरुणकेतु कमग्निं चिन्वान इति । य
एवासौ। इतश्चामुतश्चाव्यतीपाती।
तमिति । योग्नेमिथूया वेद मिथुनवान् भवति।
आपो वा अग्नेर्मिथूयाः। मिथुनवान् भवति। य

एवं वेद॥८९॥

आपो वा इदमासन्थ्सलिलमेव स प्रजापतिरेकः पुष्करपर्णे समभवत्। तस्यान्तर्मनसि कामः समवर्तत। इदं सृजेयमिति। तस्माद्यत्पुरुषो मनसाऽभिगच्छति। तद्वाचा वदति। तत्कर्मणा करोति। तदेषाऽभ्यनूक्ता । कामस्तदग्रे समवर्तताधि। मनसो रेतः प्रथमं यदासीत्॥९०॥

सतो बन्धुमसति निरविन्दन्। हृदि प्रतीष्या कवयो मनीषेति

उपैनं तदुपनमति। यत्कामो भवति। य एवं वेद । स तपोऽ तप्यत। स तपस्तप्त्वा। शरीरमधूनुत।

तस्य यन्मांसमासीत्। ततोऽरुणाः केतवो वातरशना ऋषय उदतिष्ठन्॥९१॥

ये नखाः। ते वैखानसाः। ये वालाः। ते वालखिल्याः। यो रसः सोऽपाम्। अन्तरतः कूर्मं भूतं सर्पन्तम्। तमब्रवीत्। मम वै त्वङ्मासं सा। समभूत्॥९२॥

नेत्यब्रवीत्। पूर्वमेवाहमिहासमिति। तत्पुरुषस्य पुरुषत्वम्। स सहस्रशीर्षा पुरुषः। सहस्राक्षः सहस्रपात्। भूत्वो- दतिष्ठत्। तमब्रवीत्। त्वं वै पूर्वं समभूः। त्वमिदं पूर्वं कुरुष्वेति। स इत आदायापः॥९३॥

अञ्जलिना पुरुस्तादुपादधात्। एवाह्येवेति। तत आदित्य उदतिष्ठत्। सा प्राची दिक् । अथारुणः केतुर्दक्षिणत उपादधात्। एवा ह्यग्न इति। ततो वा अग्निरुदतिष्टत् सा दक्षिणा दिक्। अथारुणिः केतुः पश्चादुपादधात्। एवा हि वायो इति॥९४॥

ततो वायुरुदतिष्ठत्। सा प्रतीची दिक्। अथारुणः केतुरुत्तरत उपादधात्। एवाहीन्द्रेति। ततो वा इन्द्र उदतिष्ठत्। सोऽदीची दिक्। अथारुणः केतुर्मध्य उपादधात्। एवा हि पूषन्निति। ततो वै पूषोऽदतिष्ठत्। सेऽयं दिक्॥९५॥

अथारुणः केतुरुपरिष्टादुपादधात्। एवा हि देवा इति। ततो देवमनुष्याः पितरः गन्धर्वाप्सर सश्चोदतिष्ठन्।

सोऽर्ध्वा दिक्। या विप्रषो विपरापतन्। ताभ्यो सुरा रक्षांसि पिशाचाश्चेदतिष्ठन्। तस्मात्ते पराभवन्। विप्रड्भ्यो हि ते समभवन्। तदेषाऽभ्यनूक्ता॥९६॥

अपो ह यद्बृहती गर्भमायन्। दक्षं दधाना जनयन्तीः स्वयंभुम्। तत इमेऽध्यसृज्यन्त सर्गाः। अद्भ्यो वा इदं समभूत्। तस्मादिदं सर्वं ब्रह्म स्वयंभ्विति। तस्मदिदं सर्वं शिथिलमिवाध्रुव मिवाभवत्। प्रजापतिर्वाव तत्। आत्मनाऽऽत्मानं विधाय। तदेवानु प्राविशत्। तदेषाऽभ्यनुक्ता॥९७॥

विधाय लोकान् विधाय भूतानि। विधाय सर्वाः प्रदिशो दिशश्च। प्रजापतिः प्रथमजा ऋतस्य। आत्मनाऽऽ त्मानमभिसंविवेशेति। सर्वमेवेदमाप्त्वा। सर्वमवरुध्य। तदेवानु प्रविशति। य एवं वेद॥९८॥

चतुष्टस्य आपो गह्णाति। चत्वारि अपां रूपाणि। मेघो विद्युतस्तनयित्नुर्वृष्टिः। तान्येवावरुन्धे आतपति वर्ष्या गृह्णाति। ताः पुरस्तादुपधाति। एता वै ब्रह्मवर्चस्या आपः। मुखत एव ब्रह्मवर्चसमवरुन्धे। तस्मान्मुखतो ब्रह्म वर्चसितरः॥९९॥

कूप्या गृह्णाति। ता दक्षिणत उपदधाति एता वै तेजास्विनीरापः। तेज एवास्य दक्षिणतो दधाति। तस्माद्दक्षिणोऽर्धस्तेजस्वितरः। स्थावरा गृह्णाति। ताः पश्चादुपदधाति। प्रतिष्ठिता वै स्थावराः। पश्चेदव प्रतितिष्ठति। वहन्ता गृह्णति॥१००॥

ता उत्तरत उपदधाति। ओजसा वा एता वहन्तीरिवोद्गतीरिव
अकूजतीरिव धावन्तीः।
ओज एवास्योत्तरतो दधाति। तस्मादुत्तरोऽ र्ध ओजस्वितरः।
संभार्य गृह्णाति। ता मध्य उपदधाति। इयं वै सभार्याः। अस्यामेव प्रतितिष्ठति। पल्वल्या गृह्णाति। ता उपरिष्टादुपादधाति॥१०१॥

असौ वै पल्वल्याः। अमुष्यामेव प्रतितिष्ठति। दिक्षूप दधाति। दिक्षु वा आपः। अन्नं वा आपः। अद्भ्यो वा अन्नं जायते। यदेवाद्भ्योऽन्नं जायते। तदवरुन्धे। तं वा एतमरुणाः केतवो वातरशना ऋषयोऽचिन्वन्।

तस्मादारुणकेतुकः। तदेषाऽभ्यनूक्ता। केतवो अरुणासश्च। ऋषयो वातरशनाः। प्रतिष्ठा शतधा हि समाहिता। सोऽसहस्रधायसमिति। शतशश्चैव सहस्रशश्च प्रतितिष्ठति। य एतमग्निं चिनुते। य उ चैनमेवं वेद॥१०३॥

जानुदघ्नीमुत्तरवेदीं खात्वा। अपां पूरयति। अपां सर्वत्वाय । पुष्करपर्णं रुक्मं पुरुषमित्युपदधाति तपो वै पुष्करपर्णण्। सत्य रुक्मः। अमृतं पुरुषः। एतावद्वावास्ति। यावदेतत्। यावदेवास्ति॥१०३॥

तदवरुन्धे । कूर्ममुपदधाति। अपामेव मेघमवरुन्धे। अथो स्वर्गस्य लोकस्य समष्ट्यै। आपमापामपः सर्वाः अस्मादस्मादितोऽमुतः। अग्निर्वायुश्च सूर्यश्च। सह संचस्करर्धिया इति। वाय्वश्चा रश्मिपतयः। लोकं पृणाच्छिद्रं पृण॥१०४॥

यास्तिस्रः परमजाः । इन्द्रघोषा वो वसुभिरेवा ह्येवेति। पञ्च चितय उपदधाति। पांक्तोऽग्निः। यावानेवाग्निः। तं चिनुते। लोकं पृणया द्वितीयामुपदधाति। पञ्चपदा वै विराट्। तस्या वा इयं पादः। अन्तरिक्षं पादः। द्यौः पादः। दिशः पादः। परोजाः पादः। विराज्येव प्रतितिष्ठति। य एतमग्निं चिनुते। य उ चैनमेवं वेद॥१०५॥

अग्निं प्रणीयोपसमाधाय । तमभित एता अभीष्टका उपदधाति। अग्निहोत्रे दर्शपूर्णमासयोः। पशुबन्धे चातुर्मास्येषु। अथो आहुः। सर्वेषु यज्ञक्रतुष्विति। अथ ह स्माहारुणः स्वायंभुवः। सावित्रः सर्वोऽग्नि रित्यननुषंगं मन्यमहे। नाना वा एतेषां वीर्याणि। कमग्निं चिनुते॥१०६॥

सत्रियमग्निं चिन्वानः। कमग्निं चिनुते। सावित्रमग्निं चिन्वानः। कमग्निं चिनुते। नाचि-केतमग्निं चिन्वानः। कमग्निं चिनुते। चातु र्होत्रियवाग्निं चिन्वानः। कमग्निं चिनुते। वैश्वसृजमग्निं चिन्वानः। कमग्निं चिनुते॥१०७॥

उपानुवाक्यमाशुमग्निं चिन्वानः। कमग्निं चिनुते। इममारुणकेतुकमग्निं चिन्वान इति। वृषा वा अग्निः। वृषाणौ संस्फालयेत्। हन्येतास्य यज्ञः। तस्मन्नानुषज्यः। सोत्तररवेदिषु क्रतुषु चिन्वीत। उत्तरवेद्यां ह्यग्निश्चीयते। प्रजाकामश्चिन्वीत॥१०८॥

प्राजापत्यो वा एषोऽग्निः। प्राजापत्याः प्रजाः। प्रजावान् भवति। य एवं वेद। पशुकामश्चिन्वीत। संज्ञानं वा एतत्पशूनाम्। यदापः। पशूनामेव संज्ञानेऽग्निं चिनुते। पशुमान् भवति। य एवं वेद।।१०९।।

वृष्टिकामश्चिन्वीत। आपो वै वृष्टिः। पर्जन्यो वर्षको भवति। य एवं वेद। आमयावी चिन्वीत। आपो वै भेषजम्। भेषजमेवास्मै करोति। सर्वमायुरेति। अभिचरश्चिन्वीत। वज्रो वा आपः।।११०।।

वज्रमेव भ्रातृव्येभ्यः प्रहरति। स्तृणुत एनम्। तेजस्कामो यशस्कामः। ब्रह्मचर्यसकामः स्वर्गकामश्चिन्वीत। एतावद्वाऽस्ति। यावदेतत्। यावदेवास्ति । तदवरुन्धे। तस्यैतद्व्रतम्। वर्षति न धावेत्।।१११।।

अमृतं वा आपः। अमृतस्यानन्तरित्यै। नाप्सु मूत्रपुरीषं कुर्यात्। न निष्ठीवेत्। न विवसनः स्नायात्। गुह्यो वा एषोऽग्निः। एतस्याग्नेर नतिदाहाय। न पुष्करपर्णानि हिरण्यं वाऽधिष्ठेत्। एतस्याग्नेरनभ्यारेहाय। न कुर्मस्याश्नीयात्।

नोदकस्या धातुकान्येन मोदकानि भवन्ति। अघातुका आपः। य एतमग्निम् य उ चैनमेवं वेद।।११२।।

इमा नुकं भुवना सीषधेम। इन्द्रश्च विश्वे च देवाः। यज्ञं च नस्तन्वं च प्रजां च। आदित्यैरिन्द्रः सह सीषधातु। आदित्यैरिन्द्रः सगणो मरुद्भिः। अस्माकं भूत्ववविता तनूनाम्। आ ल्पवस्वप्र प्लवस्व। आण्डीभवज मा मुहुः। सुखादीं दुःखनिधनाम्। प्रतिमुञ्चस्व स्वां पुरम्।।११३।।

मरीचयः स्वायंभुवाः। ये शरीराण्यकल्पयन्। ते ते देहं कल्पयन्तुं । मा च ते ख्यस्मती रिषत्। उत्तिष्ठत मा स्वप्त। अग्निमिच्छध्वं भारताः। राज्ञः सोमस्य तृप्तासः। सूर्येण सयुजोषसः। युवा सुवासाः। अष्टचक्रा नवद्वारा।।११४।।

देवानां पूरयोध्या। तस्यां हिरण्मयः कोशः। स्वर्गो लोको ज्योतिषाऽवृतः। यो वै तां ब्रह्मणो वेद। अमृतेनावृतां पुरीम्। तस्मै ब्रह्म च ब्रह्मा च आयुः कीर्तिं प्रजां ददुः। विभ्राजमानां हरिणीम्। यशसा संपरीवृताम्। पुरं हिरण्मयीं ब्रह्मा।।११५।।

विवेशाऽपराजिता । परांगेत्यज्यामयी। परांगेत्यनाशकी। इह चामुत्र चान्वेति। विद्वान् देवासुरानुभयान्। यत्कुमारी मन्द्रयते। यद्योषिद्यत्पतिव्रता। अरिष्टं यत्किञ्च क्रियते। अग्निस्तदनु वेधति। अश्रुतासश्रृतासश्च॥११६॥

यज्वानो येऽयज्वानः। स्वर्यन्तो नापेक्षन्ते। इन्द्रमग्निं च ये विदुः। सिकता इव सयन्ति। रश्मिभिः समुदीरिताः। अस्माल्लोकादमुष्माच्च। ऋषिभिदपृश्निभिः अपेतवीतवि च सर्पताताः। येऽत्रस्थ पुराणा ये च नूतनाः। अहोभिरद्भिरक्तुभिर्व्यक्तम्॥११७॥

यमो ददात्वा वसानमस्मै। नृमुणन्तु नृ पात्वयः। अकृष्टा ये च कृष्टजाः। कुमारीषु कनीनीषु। जारिणाषु च ये हिताः) रेतः पीता आण्डपीताः। अंगारेषु च ये हुताः। उभयान्पुत्रपौत्रकान्। युवे हं यमराजगान्। इातमिन्नु शरदः। अदो यद् ब्रह्म विलबम्। पितृणां च यमस्य च। वरुणस्याश्विनोरग्नेः। यरुतां च विहायसाम्। कामप्रयवणं मे अस्तु। सह्येवास्मि सनातनः। इति नाको ब्रह्मिश्रवो रायो धनम्। पुत्रानापो देवीरिहाहित॥११८॥

विशीर्ष्णीं गृध्द्रशीर्ष्णीं निरुऋतिं हथः। परिबाधं श्वेतकुक्षम्। निजंधं शबलोदरम्। स तान् वाच्या यया सह। अग्ने नाशय संदृशः। ईर्ष्यासूये बुभुक्षाम्। मन्युं कृत्यां च दीधिरे। रथेन किंशुकावता। अग्ने नाशय संदृशः॥११९॥

पर्जन्याय प्र गायत। दिवस्पुत्राय मीढुषे। स नो यवसमिच्छतु। इदं वचः पर्जन्याय स्वराजे। हृदो अस्त्वन्तरं तद्युयोत। मयो भूर्वातो विश्वकृष्टयः सन्त्वस्मे। सुपिप्पला ओषधीर्देवगोः। यो गर्भमोषधीनाम्। गवां कृणोत्यर्वताम्। पर्जन्यः पुरुषीणाम्॥१२०॥

पुनर्मा मैत्विन्द्रियम्। पुनरायुः पुनर्भगः। पुनर्ब्राह्मणमैतु मा पुनर्द्रविणमैतु मा। यन्मेऽद्यरेतः पृथिवीमस्कान्। यदोषधिरप्यसरद्यदापः। इदं तत्पुनराददे। दीर्घायुत्त्वाय वर्चसे। यन्मे रेतः प्रसिच्यते । यन्म आजायते पुनः। तेन माममृतं कुरु । तेन सुप्रजसं कुरु॥१२१॥



*Devotees of Para-vāsudeva*

अद्भ्यस्तिरोधा जायत। तव वैश्रवणः सदा तिरोधेहि सपत्नान्नः। ये अपोऽश्नन्ति। त्वाष्ट्रीं मायां वैश्रवणः। रथं सहस्रवं धुरम्। पुरुश्चक्रं सहस्राश्वम्। आस्थायायाहि नो बलिम्। यस्मै भूतानि बलिमावहन्ति। धनं गावो हस्ति हिरण्य मश्वान्।।१२२।।

असाम सुमतौ यज्ञियस्य। श्रियं बिभ्रतोऽन्नमुखीं विराजम्। सुदर्शने च क्रौञ्चे च। मैनागे च महागिरौ। शत द्वाट्टारगमंता। संहार्यं नगरं तव। इति मन्त्राः। कल्पोऽत ऊर्ध्वम्। यदि बलिं हरेत्। हिरण्यनाभये वितुदये कौबेरायायं बलिः।।१२३।।

सर्वभूताधिपतये नम इति। अथ बलिं हृत्वोपतिष्ठेत। क्षतं क्षतं वैश्रवणः। ब्राह्मणा वयं स्मः। नमस्ते अस्तु मा मा हिंसीः। अस्मात्प्रविश्यान्नमद्धीति। अथ तमग्निमादधीत। यस्मिन्ने तत्कर्म प्रयुञ्जीत। तिरोऽधा भूः तिरोधा भुवः।।१२४।।

तिरोऽधाः स्वः। तिरोधा भूर्भुवः स्वः। सर्वेषां लोकानामाधिपत्ये सीदति। अथ तमग्निमिन्धीत।

तस्मिन्नेतत्कर्म प्रयुञ्जीत। तिरोऽधा भूः स्वाहा। तिरोऽधा भुवः स्वाहा। तिरोऽधाः स्वः स्वाहा। तिरोऽधा भूर्भुवः स्वः स्वाहा। यस्मिन्नस्य काले सर्वा आहुतीर्हुता भवेयुः।।१२५।।

अपि ब्राह्मणमुखीनाः। तस्मिन्नहः काले प्रयुञ्जीत। परः सु जनाद्वेपि। मास्म प्रमाद्यन्तमध्यापयेत्। सर्वार्थाः सिद्ध्यन्ते । य एवं वेद। क्षुध्यन्निदमजानताम्। सर्वार्था न सिद्ध्यन्ते। यस्ते विघातुको भ्राता। ममान्तर्हृदये श्रितः।। १३६।।

तस्मा इममग्रपिण्डं जुहोमि। स मेऽर्थान्माविधीत्। मयि स्वाहा। राजाधिराजाय प्रसह्य साहिने। नमो वयं वैश्ररणाय कुर्महे। स मे कामान् कामकामाय मह्यम्। कामेश्वरो वैश्रवणो ददातु। कुबेराय वै श्रवणाय, महा राजाय नमः। केतवो अरुणासश्च। ऋषयो वातरशनाः। प्रतिष्ठां शतधा हि। समाहितासोऽसहस्रधायसम्। शिवा नश्यन्तमा भवन्तु दिव्या आप ओषधयः। सुमृडीका सरस्वति। या ते व्योम  संदृशि।।१३७।।

संवत्सरमेतद्व्रतं चरेत्। द्यौ वा मासौ। नियमः समासेन। तस्मिन्नियमविशेषाः। त्रिषवणमुद कोपस्पर्शी। चतुर्थकालपान भक्तः स्यात्। अहरहवो भैक्षमाश्नीयात्। औदुम्बरीभिः। समिद्भिरग्नि परिचरेत्। पुनर्मा मैत्विन्द्रियमित्येतेऽनु-वाकेन। उद्धृत परिपूताभिरद्भिः कार्यं कुर्वीत।।१२८।।

असञ्चयवान्। अग्नये वायवे सूर्याय। ब्रह्मणे प्रजापतये। चन्द्रमसे नक्षत्रेभ्यः। ऋतुभ्य संवथ्सराय। वरुणायारुणायेति व्रतहोमाः। प्रवर्ग्यवदादेशः। अरुणाः काण्डऋषयः। अरण्येऽधीयीरन्। भद्रं कर्णेभिरिति द्वे जपित्वा।।१२९।।

महानाम्नीभिरुदकं संस्पर्श्य। तमाचार्यो दद्यात्। शिवा नश्यन्तमेत्योषधीरालभते। सुमृडीकेति भूमिम्। एवमपवर्गे धेनुर्दक्षिणा। कंसं वासश्च क्षौमम्। अन्यद्वा शुक्लम्। यथाशक्ति वा। एवं स्वाध्याय धर्मेण। अरण्येऽधीयीत। तपस्वी पुण्यो भवति तपस्वी पुण्यो भवति।।१३०।।

ॐ भद्रं कर्णेभिः श्रुणुयाम देवाः। भद्रं
पश्येमाक्षभि र्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिः।
व्यशेम देवाहितं यदायुः।।

स्वस्ति न इन्द्रो वृद्धश्रवाः।
स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्ताक्ष्यों अरिष्टनेमिः।
स्वस्ति नो बृहस्पतिर्दधातु।।

।।ॐ शान्तिः शान्तिः शान्तिः।।



*Kaṇṇappa-nāyanār (from Tiruvelangādu)*

# CHAPTER SIX

## NAMASKĀRA IN A TEMPLE

Circumambulation and prostration are elaborate procedures in a temple complex. There are āgamic prescriptions about the manner, number, attitude and differences in prostrations as well as

circumambulations. Circumambulation (pradakshiṇa) comes before prostration (namaskāra) in the sequence of worship. They constitute the final acts.

Namaskāra comes at the end of the elaborate worship with sixteen sequences.

1. āvāhana: invocation

2. āsana : providing a seat forth deity (by offering a tulasī leaf)

3. Pādya : water for the feet

4. arghya : respectful oblation (water)

5. āchamanīya : water for ceremonial sipping

6. snāna : ritual bath, oblation (water)

7. vastra : garments (tulasī leaves)

8. upavastra : upper garments (also tulasī leaves)

9. gandha : perfumes and sandal paste (chandana)

10. pushpa : flowers for decoration

11. dhūpa : incense

12. dīpa : illumination, waving of lights

13. naivedya : food-offering

14. pradakshiṇa : circumambulation

15. mantra-pushpa : flowers in the form of recitation of mantras

16. namskāra : final act of adoration

**अष्टाङ्गादिनमस्कारः, तत्फलं च ॥**

प्रणम्य दंडवद् भूमौ साष्टाङ्गं कुसुमं क्षिपेत् ॥

**अंशुमति-**

पशोः पाशुपतेरग्रे दण्डवत् पतिते भुवि ।
पतन्ति पातकास्सर्वे नोत्तिष्ठन्ति पुनस्सह ॥

देहसंसक्तरेणूनां यावत्संख्याभिगण्यते ।
तावद्वर्षसहस्राणि शिवलोके महीयते ॥

अष्टाङ्गं चैव पञ्चाङ्गं त्र्यङ्गं चैकाङ्गकं वरम् ।

**अष्टाङ्गविधानम् ॥**

उरसा शिरसा दृष्टिवचसा मनसा तथा ॥

पद्भ्यां दोर्भ्यां च पाणिभ्यां प्रणामोऽष्टाङ्गमीरितम्।
शिरो हस्तौ च कंठौ च चिबुकं बाहुयुग्मकम्॥

अष्टांगं च नमस्कारं पञ्चाङ्गं च ततः श्रृणुः ।

**पञ्चाङ्गम् ॥**

शिरो हस्तौ च बाहू च कृत्वा जानुनि संस्थिते ॥
इदं पञ्चाङ्गमेवोक्तं त्र्यङ्गं च ततः श्रुणु ।

**त्र्यङ्गम् ॥**

हस्तौ बध्वा तु मुकुलः ममर्ध्नि देशे नियोजयेत्॥
त्र्यङ्गलक्षणं चैव नमस्कारस्य संख्यया ।

**एकाङ्गम् ॥**

एकाङ्गं तु नमस्कारं शिरसैव कृतं भवेत् ॥

**नमस्कारसंख्या ॥**

त्रीणि पञ्चापि सप्तापि नव द्वादश संख्यया ।

**नमस्कारस्थानं, तत्फलं च ॥**

भक्त्या कृत्वा नमस्कारं शिवस्याग्रे ततो तरः ॥

अश्वमेधस्य यज्ञस्य लभते फलमुत्तमम् ।
भक्तिहीनैर्नरैर्जाड्यात् अपि बाधा शिवे कृता ॥

नमास्क्रिया सकृद्वापि सर्वपापहरी भवेत् ।
तस्माल्लिङ्गं सकृद्भक्त्या यो लिंङ्गं प्रणमेन्नरः ॥

सर्वान् कामानवाप्नोति शिवेन सह मोदते ।

**प्रदक्षिणक्रमः ॥**

**अंशुमति -**

प्रदक्षिणक्रमं वक्ष्ये श्रूयतां रविसत्तम ॥

सर्वपापहरं चैव सर्वदानफलप्रदम् ।
सर्वरोगविनाशार्थं प्रदक्षिणमथाचरेत् ॥

## प्रदक्षिणपदव्युत्पत्तिः ॥

प्रच्छिनत्ति भयं सर्वं दकारो मोक्षसिद्धिदः ।
क्षिकारात् क्षीयते रोगो णकारं श्रीप्रदायकम् ॥

प्रदक्षिणार्णसंयोगात् प्रदक्षिणमिति स्मृतम् ।
पदात् पदान्तरं गच्छत् करौ चलनवर्जितौ ॥

स्तुतिर्वाचि हृदि ध्यानं चतुरङ्गं प्रदक्षिणम् ।
आसन्नप्रसवा नारी तैलपूर्णं यथा घटम् ॥

वहन्ती शनकैर्याति तथा कुर्यात् प्रदक्षिणम् ।

## प्रदक्षिणकालफलम् ॥

पूर्वाह्णे व्याधिनाशः स्यात् मध्यह्णे
वाञ्छितार्थदम् ॥
सायाह्णे सर्वपापघ्नं अर्धयामे विमुक्तिदम् ।
अष्टम्यां च चतुर्दश्यां पञ्चदश्यां त्रिजन्मनि ॥

आर्द्रायामर्कवारे च करणे विष्टिसंज्ञके ।
अयने विषवे चैव ग्रहणे चन्द्रसूर्ययोः ॥

संक्रमे चोत्सवे चैव स्तुत्वा कृत्वा प्रदक्षिणम् ।
प्रणमेद्यं शिवं भक्त्या सर्वान् कामानवाप्य सः॥

लभेच्छतगुणं पुण्यं केवलं नात्र संशयः ।
एवमुक्तेषु कालेषु भक्तिश्रद्धासमन्वितः ॥

सूर्योदयं समारभ्य यावदस्तं रवेर्भवेत् ।
तावत् प्रदक्षिणं कृत्वा सर्वान् कामानवाप्नुयात् ॥

अथाहोरात्रकं वापि कालेष्वेतेषु यो नरः ।
प्रदक्षिणं प्रकुर्वीत सोऽत्यन्तफलमश्नुते ॥

दूरमार्गात् समाचम्य फलाशारहितोऽपि यः ।
कृत्वा प्रदक्षिणीकृत्य प्रणमेच्छिवमव्ययम् ॥

तस्या मार्गात्समुद्भूता या गतिश्चापि केशव ।
प्रदक्षिणफलं नृणां ददात्येव न संशायः ॥

प्रवासी पाथि कृत्वा तु शिवलिङ्गे प्रदक्षिणम् ।
नमस्कृत्वा तु पूर्वोक्तं फलं पञ्चगुणं भवेत् ॥

उत्सवे बलिका तु यः करोति प्रदक्षिणम् ।
पदे पदेऽश्वमेधस्य फलमाप्नोति मानवः ॥

## प्रदक्षिणस्थानफलम् ॥

**अजिते –**

गर्भगेहे च कस्योक्तं दीक्षितस्यैव बाह्यके ।
प्रदक्षिणं नृणां नोक्तमन्तर्मण्डलतस्सदा ॥

अन्तस्सारकृतं प्रोक्तं फलमेकं प्रदक्षिणम् ।
त्रिगुणं मध्यहारे तु मर्यादायां चतुर्गुणम् ॥

महामर्यादिकं चैव कृतं पञ्चगुणं भवेत् ।
क्षेत्रावधि वृतं बाह्ये भवेच्छतगुणं नृणाम् ॥

## प्रदक्षिणसंख्याफलम् ॥

**स्वायम्भुवे –**

एकविंशातिसंख्यातमुत्तमं तु प्रदक्षिणम् ।
एकहस्तनमस्कारः हन्ति पुण्यं पुरातनम् ॥

शतं सहस्रमयुतं नियुतं प्रयुतं तु वा ।
कोटि वा कारयेद्यस्तु सिध्यर्थं तु प्रदक्षिणम् ॥

## मानुषादिलिङ्गप्रदक्षिणसंख्या ॥

मानुषस्य तु लिङ्गस्य फलमुक्तं प्रदक्षिणम् ।
नमस्कारेण तस्माद्वै द्विगुणं चार्षके भवेत् ॥

त्रिगुणं दैविके लिङ्गे फलं गाणेश्वरे च तत् ।
चतुर्गुणं समुद्दिष्टं फलं पञ्चगुणं भवेत् ॥

स्वयंभूतस्य लिङ्गस्य तथा संस्पर्शने शानैः ।

## नानादेवताप्रदक्षिणसंख्या ॥

**स्मृतिसंग्रहे –**

एकं विनायके कुर्यात् द्वे सूर्ये त्रीणि शंकरे ॥

चत्वारि देव्या विष्णोश्च सप्ताश्वत्थप्रदक्षिणम् ।

## ब्रह्मनारदीये –

राजन् प्रदक्षिणैकेन मुच्यते ब्रह्महत्यया ।
द्वितीयेनाधिकारी स्यात् तृतायेनैन्द्रसंपदः ॥

## सोमसूत्रप्रदक्षिणम् ॥

प्रदक्षिणप्रकारस्य लक्षणं श्रृणु सुव्रत ।
सव्यं चैवापसव्यं च तथा सव्यापसव्यकम् ॥

सव्यं प्रदक्षिणं प्रोक्तं अपसव्याप्रदक्षिणम् ।

## सव्यापसव्यतः सोमसूत्रकम् ।

लिङ्गमूलस्य पार्श्वे तु योजयेत् सौम्यदेशके ॥



*Garuḍāsana (wood, temple chariot of Śuchindram)*

**छायादोषः ॥**

यावत् सूत्रान्तमेवं स्यात् वर्जयेत्तु प्रदक्षिणम् ।
शंभोः प्रदक्षिणं कुर्यात् सोमसूत्रं न लङ्घयेत् ॥

ङ्घनादेकमेकं स्यात् अलंघ्यमततत्रयम् ।
महाधामस्य सूत्रेण महच्छायां च लंघयेत् ॥

छायाधस्तात् प्रकर्तव्यं विमाने तु प्रदक्षिणम् ।
छायातिलङ्घने प्राप्ते कथं कुर्यात् प्रदक्षिणम् ॥

अन्ते त्र्यंशं विहायादौ संवरे द्वयंशके बुधः ।
लिङ्गच्छायां तु पीठं स्यात् प्रासादं
प्रतिमास्तथा ॥

उत्सवे बलिकाले च तथैव गुरुसेविते ।
प्रदक्षिणक्रियाकाले छायादोषो न विद्यते ॥

सोमसूत्रत्रयं यत्र यत्र वा विष्णुमन्दिरम् ।
अपसव्यं न कुर्वीत कुर्यादेव प्रदक्षिणम् ॥

वृषं चण्डं वृषं चैव सोमसूत्रं पुनर्वृषम् ।
चण्डं च सोमसूत्रं च पुनश्चण्डं पुनर्वृषम् ॥

एवं सव्यापसव्यं तु प्रदक्षिणमिहोदितम् ।
अङ्गप्रदक्षिणं कुर्वन् कृत्वा भूमौ निजां तनुम् ॥

दण्डवत् बाहुयुग्मेन सह बध्वा कृताञ्जलिः ।
कृत्वा दण्डनमस्कारं शिवाग्रे तु सकृन्नरः ॥

प्रदक्षिणमथो कुर्यादेकं वा त्रयमेव वा ।
पञ्च वा सप्त वा चैव सर्वपापनिवृत्तये ॥

उत्थाय प्रणतिं भूयो भूयः कृत्वा समापयेत् ।
प्रदक्षिणसहस्रं स्यादेकमेवं प्रदक्षिणम् ॥

**सव्यापसव्यप्रदक्षिणफलम् ॥**

**स्वायंभुवे –**

सव्यं तु भोगदं ज्ञेयं अपसव्यं तु मुक्तिदम् ।
सव्यापसव्यमार्गेण शान्तिमुक्तिफलप्रदम् ॥

यत्र यत्रावृतौ किन्तु बलिपीठवृषस्थितिः ।
तत्र तत्रावृतौ कुर्यात् तत् प्रधानं प्रदक्षिणम् ॥

यत्र प्रदक्षिणं कृत्वा बलिपीठेशयोस्तु वा ।
नान्तरागमनं कुर्यात् तत्तदावरणे सुधीः ॥

द्वितीयावरणद्वारपालकौ गणनायकौ ।
नत्वाभ्यर्च्यान्तः प्रविश्य स्तुत्वैवं
शिवभक्तिमान् ॥

एकं सव्यं त्वसव्यं दशशतशतके द्वे च लक्षे
वृषाद्ये
नत्वा नत्वा च कोटिप्रणतिपरिवृतं सप्तकोट्यः
शिवस्य ।

कोटेर्लक्षं तदङ्गैर्महति दशशतं प्राङ्गणे शूषकाक्ष्यात्
प्रादक्षिण्यक्रमेऽयं प्रतिपदमवहामोक्षदोक्तानवद्ये ॥

पञ्चमावरणं शंभोः कृतं कोटिप्रदक्षिणम् ।
सप्तसंधिद्वीपायां कृतं कोटिप्रदक्षिणम् ॥

*Gajendramoksham*



*Devotees*



# APPENDIX ONE

# DĪPA-NAMASKĀRA

There is a ritual known as `Dīpa-namaskāra' which is in vogue in some parts of the country. It involves the ceremonial lighting up of five lamps on a single lampstand (dīpa-stambha). The five lights represent five forms of Durgā (pañcha-durgā), Śakti-durga, Rāja-

durga, Agni-durgā, Aiśvarya-durgā and Rakshā-durga. They are formally invoked and worshipped. During the ritual, eight Bhairavas as attendant-deities of Durgā are also invoked and worshipped. The ritual takes the usual form of the elaborate worship of the mother-goddess, Durgā, and ends with the recitation of Sapta-Śatī. The important detail of this worship is the series of prostrations offered to Durgā invoked in the lighted lamps, hence called `Dīpa-namaskāra'. The customary sequences of the ritual are given below.

श्रीमहागणपतये नमः।।

अथ पञ्चदुर्गादीपनमस्कार विधिः।।

यजमानः स्नानसन्ध्यादिकं कृत्वा आचम्य पवित्रपाणिः सपत्नीकः गुरुगणपतिंपूजा नमस्कारपूर्वकं आसनशुद्धिं कृत्वा प्राणानायम्य देशकालौ स्मृत्वा मम नक्षत्रे........राशौ जातस्य अनुपादि श्रुतिस्मृति पुराणोक्तफलसिध्यर्थं चिंन्तितसकल मनोरथावाप्त्यर्थं, यथा सम्भवद्रव्यैः मन्त्रराधनदीपप्रज्वलन आवाहनप्राणप्रतिष्ठापन पञ्चामृतादिसहित नानासूक्तस्नपनकल्पोक्त ध्यानादि पूजन कुंकुमार्चनपुष्पांजलिंसमर्पणपूजादिपूर्वकं पञ्चदुर्गादीपमस्काराख्यं कर्म करिष्ये ।।

इति संकल्प्य।।

घण्टानादं कृत्वा ।। कलशार्चनम् ।।

शंखार्चनम्।। आत्मपूजा।। मूलमन्त्रन्यासपूर्वकं देहे लिपिन्यासं मूलमन्त्राक्षरन्यासं कृत्वा।।

मण्टपध्यानं द्वारपूजां च कृत्वा।। फट् इति मन्त्रेण यन्त्रं गन्धपुष्पादि पूजाद्व्याणि प्रोक्ष्य यन्त्रे पीठपूजां कुर्यात्।।

ओं गुं गुरुभ्यो नमः।।

गं गणपतये नमः।।

ह्रीं प्रकृत्यै नमः।।

कुं कूर्माय नमः।।



सं सौम्याय नमः॥

भं भद्रायै नमः॥

जं जयायै नमः॥

अं आर्यायै नमः॥

ब्रं बलाय नमः॥

भ्रं प्रबलाय नमः॥

भ्रं महाज्वालाय नमः॥

पं पल्वाय नमः॥

मं मायायै नमः॥

विं विद्यायै नमः॥

कं कन्दाय नमः॥

नं नालाय नमः॥

लं पद्माय नमः॥

अं सूर्यमण्डलाय नमः॥

उं सोममण्डलाय नमः॥

वं विह्निमण्डलाय नमः॥

अं आत्मने नमः॥

उं अन्तरात्मने नमः॥

मं परमात्मने नमः।।

उं ज्ञानात्मने नमः।।

नवशक्तयः।।

जयायै।।

विजयायै।।

भद्रायै।।

भद्रकाल्यै।।

सुमुख्यै।।

दुर्मुख्यै।।

व्याघ्रमुख्यै।।

सिंहमुख्यै।।

दुर्गायै।।

ओं वज्रदंष्ट्रायुधाय महासिंहाय।।

हुं नमः फट्।।

इति पीठपूजा।।

एवं यन्त्रमध्ये पंचदुर्गा उपवेशनयोग्यं पीठं प्रकल्पयेत्।।

नारदऋषिः।।

गायत्री छन्दः।श्री भुवनेश्वरी देवता।। ह्रीं भुवनेश्यर्यै नमः।। श्री भुवनेश्वरीं आवहयामि।।

इत्यावाहनं कृत्वा।। द्रां इत्यादि बडंगं कृत्वा।। विधिवत् पूज्ययंत्रस्य प्रागाद्यष्टदिक्षु मध्ये च नवस्वस्तिकां कृत्वा।।

ततः इदं ते पातं इति मन्त्रेण दीपस्तम्भं ध्रुवाध्यौ ध्रुवा इति सूक्तमुच्चारन् घण्टानादपूर्वकं यन्त्रे प्रतिष्ठाप्य।। अं ' गृहा वै प्रतिष्ठा' इत्यादिकमपि जपेत्।।

अं तन्तुं इति मन्त्रेण वर्तनी निधाय, 'शुक्रमपि ज्योतिः' इति मन्त्रेण आज्यं वा तिलतैलं वा आसिच्य ' ज्योतिष बृहता' इति मन्त्रेण प्रत्येकमेकं दीपं प्रज्वाल्य।। तेन पूर्वादिक्रमतः पुरोवक्ष्यमाणमन्त्रैः दीपपंचकं प्रज्वालयेत्।।

ह्रीं यां कल्पयान्तीं....... ओं जातवेदसे......।।१।।

ह्रीं यां कल्पयन्तीं........ओं तामग्निवर्णां....।।२।।

ह्रीं यां कल्पयन्तीं........ओं अग्ने त्वां.......।।३।।

ह्रीं यां कल्पयन्तीं.........ओं विश्र्वाविनो दुर्गा.....।।४।।

ह्रीं यां कल्पयन्तीं........ ओं

पृतनाभितरुं.....॥५॥

इति दीपपंकचं प्रज्वाल्य॥ यन्त्रस्य परितः

अष्टदिक्षु मध्ये च स्योना.....

पृथिवि इत्यादि वैदिकमन्त्रैः स्वस्तिकानवकं

संस्थाप्य॥ स्वात्मसंस्थामजां शुद्धां त्वामद्य

परमेश्वरि। अरण्यामिव हव्याशं दीपेषु

स्वस्तिकायं च आवाहयाम्यहम्॥

जातवेदसे

भूः शक्तिदुर्गां आवाहयामि॥ इत्यादीनावाह्य॥

सें दुर्गायै नमः॥ इति पुष्पाञ्जलिं समर्पयेत्॥

एवं पञ्चदीपेष्वपि कुर्यात्॥

तामग्निवर्णां....॥'

भूः॥ राजदुर्गामावाहयामि॥ इत्यादि आवाह्य॥

दुं दुर्गायै नमः॥ इति पुष्पाञ्जलिं कृत्वा॥

(३) अग्ने त्वं पारया...'

भूः॥ अग्निदुर्गामावाहयामि॥

देव्यै नमः॥ इत्यादि॥

*Dīpa-Pūjā*

(४) विश्वा....।।'

भूः।। ऐश्वर्यदुर्गामावाहयामि।।

इत्यावाह्य।। तं भगवत्यै नमः।। इति पुष्पाञ्जलिः।।

पृतनाभितरुं....।।'

भूः।। रक्षादुर्गामावाहयामि।।

जां।। कन्यायै नमः।। इति पुष्पाञ्जलिं समर्पयेत्।।

स्वस्तिकायां मूलेन दुर्गामावाह्य बहिरष्टदिक्षु पूर्वादिक्रमेण

'इन्द्र वो विश्वत....' इति मन्त्रमुक्त्वा।।

असितांगभैरवाय नमः।। भूः इन्द्रसहितासितांगभैरवमावाहयामि।।

एवं क्रमेण तत्तद्दिक्पालोक्त-वैदिकमन्त्रसहित च चतुर्थ्यन्तैकवचनान्तानि अष्टभैरवनामानि उच्चार्य आवाहयेत्।।

अथ भैरवनामानि।। असितांगभैरव।।

रुरुभैरव।।चण्डभैरव।। कपालभैरव।।

खट्वांगभैरव।। उन्मत्तभैरव।। भीषणभैरव।।

एवं आवाह्य।। आं ह्रीं क्रों य र ल व श ष स हों।। सं हंसः।। इन्द्राद्यावाहितदेवता सहित पञ्चदुर्गाप्राण इह प्राणाः।। इत्यादि प्राणप्रतिष्ठां कृत्वा।।

ह्रीं ह्लीं हूं हीं क्ष्वौ भगवति पञ्चदुर्गे अत्रैवागच्छगच्छ।। आवाहिते।भव आवाहयामि।। इति मुद्राः प्रदर्श्य।।

कात्यायनाय विद्महे ......इति दुर्गागायत्रीं त्रिवारमुच्चरेत्।। त्रिवारं अर्घ्यम्।।

मारीच काश्यप ऋषिः त्रिष्टुप्छन्दः। जातवेदा दुर्गा देवता।। ह्रां जातवेदसे सुनवाम हृदयाय नमः।।

ह्रीं सुनवाम सोमरातीयतः।। शिरसे स्वाहा।।

ह्रैं स नः पर्षदति कवचाय हुं।।

हौं दुर्गाणिविश्वा नेत्रत्रयाय वौषट्।।

ह्रः नावेव सिन्धुं दुरितात्यग्निः।।

ध्यानम्।।

पञ्चास्या रक्तवर्णा विततदशभुजा
कोटिसूर्यप्रकाशा।
विभ्राणा शूलखड्गा त्रिशिख
शरधनुश्चक्रपाशांकुशाद्या।
रत्नोद्दामं कुठारं
सुवृढमुसलबृहद्रत्नसिंहासनस्था।

पायान्नो वैरिवर्गग्रसनपटुतरा सिद्धिदा

पञ्चदुर्गा॥

ह्रीं दुं दुर्गायै नमः॥ इति मूलमन्त्रं अष्टवारं जप्त्वा॥ लमित्यादि पञ्चोपचारं कृत्वा॥

अथ मलापकर्षणस्नानं पञ्चामृतस्नानं च॥

दुर्गासूक्तसरस्वतीसूक्त - रात्रिसूक्त - श्रीसूक्त पुरुषसूक्तादिभिः स्नपयित्वा॥ देव्यै वस्त्रभरणगन्धाक्षतपत्रपुष्पादीन् हरिद्राकुंकुमादिमंगलद्रव्याण्यपि तत्तन्मन्त्रैः समर्प्य॥ षोडशोपचारपूजां कुर्यात्॥

कात्यायन्यै ध्यानम् समर्पयामि॥ कामायै आवाहनम्॥ विन्ध्यवासिन्यै आसनम्॥ महेश्वर्यै पाद्यम्॥ सितांभोजायै॥ अर्घ्यम्॥ नारसिंह्यै आचमनीयकम्॥

महादेव्यै मधुपर्कम्॥

दयावत्यै॥ पुनराचमनीयकम्॥

शाकंभर्यै स्नानम्॥

दुर्गायै वस्त्रम्॥

सरस्वत्यै आभरणम्॥

मेधायै गन्धम्॥

सर्वसिद्धिप्रदायै॥ अक्षतान्॥

सर्वविद्याप्रदायै पुष्पाणि॥

कौसुंभर्यै॥ धूपम्॥

सुप्रतीकायै॥ दीपम्॥

शान्त्यै॥ नैवेद्यम्॥

उमायै॥ हस्तप्रक्षालनम्॥

चण्डिकायै॥ ताम्बूलम्॥

महालक्ष्म्यै॥ नीराजनम्॥

महाकाल्यै॥ मन्त्रपुष्पम्॥

शिवदूत्यै॥ प्रदक्षिणम्॥

शिवायै नमस्कारान्॥

(समर्पयामि)॥

श्रीदुर्गायै नमः॥ सर्वोपचारपूजां समर्पयामि॥

अथ अङ्गपूजा॥

वाराह्यै नमः॥ पादौ पूजयामि॥

माहेन्द्र्यै नमः॥ जानुनी पूजयामि॥

वागीश्वर्यै नमः॥ ऊरून्॥

ब्रह्माण्यै नमः॥ गुह्यं पूजयामि॥

कालरात्र्यै नमः॥ कटिं पूजयामि॥

जगन्मायायै नमः॥ नाभिं॥

माहेश्वयै नमः॥ कुक्षिं पूजयामि॥

कात्यायन्यै नमः॥ कण्ठं पूजयामि॥



*Arjuna (stone, Thali temple)*



*Arjuna (Wood, Thiruvannoor temple, Calicut)*

शिवदूत्यै नमः।। हस्तौ पूजयामि।।
नारसिंह्यै नमः।। बाहून् पूजयामि।।
इन्द्राण्यै नमः।। मुखं पूजयामि।।
शिवायै नमः।। नासिका पूजयामि।।
त्रिपुरहन्त्र्यै नमः।। कर्णौ पूजयामि।।
परमेश्वर्यै नमः।। ललाटं पूजयामि।।
कौशिक्यै नमः।। सर्वाङ्गानि पूजयामि।।
अथ आवरणपूजा।।
(१)ॐ ह्रीं पृथिवीतत्त्वात्मिकायै नमः।।
ॐ ह्रीं अप्तत्त्वात्मिकायै नमः।।
ॐ हूं तेजस्तत्त्वात्मिकायै नमः।।
ॐ ह्रीं वायुतत्त्वात्मिकायै नमः।।
ॐ क्षों आकाशतत्त्वात्मिकायै नमः।।
(२) ॐ निवृत्तिकलायै नमः।।
ॐ प्रतिष्ठाकलायै नमः।।
ॐ विद्याकलायै नमः।।
ॐ शान्तिकलायै नमः।।
ॐ इन्दिराकलायै नमः।।
ॐ दीपिकाकलायै नमः।।
ॐ रेचिकाकलायै नमः।।
ॐ मोचिकाकलायै नमः।।
(३) ॐ श्रियै नमः।।
ॐ पुष्ट्यै नमः।।
ॐ रत्यै नमः।।
ॐ मत्यै नमः।।
ॐ विद्येश्वर्यै नमः।।
(४) ॐ जागृतायै नमः।।
ॐ तापिन्यै नमः।।
ॐ वेदायै नमः।।
ॐ दुर्गायै नमः।।
ॐ दहनरूपिण्यै नमः।।
ॐ सेन्दुखण्डायै नमः।।
ॐ भवहन्त्र्यै नमः।।
ॐ नभसञ्चारिण्यै नमः।।
ॐ वागीश्वर्यै नमः।।
ॐ मन्दवाहिन्यै नमः।।
ॐ सोमरूपायै नमः।।
ॐ महातेजस्विन्यै नमः।।
ॐ मरुद्वेगायै नमः।।
ॐ रात्रिसंज्ञायै नमः।।
ॐ तीव्रकोपायै नमः।।
ॐ यशोवत्यै नमः।।

ॐ तोयात्मिकायै नमः॥

ॐ नित्यायै नमः॥

ॐ दयावत्यै नमः॥

ॐ तापहारिण्यै नमः॥

ॐ तिरस्क्रियायै नमः॥

ॐ वेदमात्रे नमः॥

ॐ अमरप्रियायै नमः॥

ॐ समाराध्यायै नमः॥

ॐ नन्दिन्यै नमः॥

ॐ मनोजवायै नमः॥

ॐ परायै नमः॥

ॐ रिपुमर्दिन्यै नमः॥

ॐ दण्डिन्यै नमः॥

ॐ तिग्मायै नमः॥

ॐ निरवद्यायै नमः॥

ॐ विशालाक्ष्यै नमः॥

ॐ सिंहवाहन्यै नमः॥

ॐ दुर्विषहारिण्यै नमः॥

ॐ निरस्तदोषायै नमः॥

ॐ निःसपत्नायै नमः॥

ॐ सपत्नायै नमः॥

(५) इन्द्राय सुराधिपतये नमः।

अग्नये तेजोधिपतये नमः।

यमाय प्रेताधिपतये नमः।

निऋतये रक्षोधिपतये नमः।

वरुणाय जलाधिपतये नमः।

वायवे प्राणाधिपतये नमः।

सोमाय नक्षत्राधिपतये नमः।

ईशानाय विद्याधिपतये नमः।

अनन्ताय नागाधिपतये नमः।

ब्रह्मणे लोकाधिपतये नमः।

(६) ॐ वज्राय नमः॥

ॐ शक्तये नमः॥

ॐ दण्डाय नमः॥

ॐ खड्गाय नमः॥

ॐ पाशाय नमः॥

ॐ अंकुशाय नमः॥

ॐ गदायै नमः॥

ॐ त्रिशूलाय नमः॥

ॐ चक्राय नमः॥

ॐ पद्माय नमः॥



*Adi-sesha, (Stone, Chidambaram)*

*Urga-Narasimha (Wood, Kaviyoor temple, Kerala)*

(७) ॐ ब्राह्म्यै नमः।।
ॐ माहेश्वर्यै नमः।।
ॐ कौमार्यै नमः।।
ॐ वैष्णव्यै नमः।।
ॐ वाराह्यै नमः।।
ॐ इन्द्राण्यै नमः।।
ॐ चामुण्डायै नमः।।
(८) ॐ शक्तिदुर्गायै नमः।।
ॐ राजदुर्गायै नमः।।
ॐ अग्निदुर्गायै नमः।।
ॐ ऐश्वर्यदुर्गायै नमः।।
ॐ रक्षादुर्गायै नमः।।
इत्यावरणपूजा।।
अथ पत्रपूजा।।
ॐ दुर्गायै नमः।। बिल्वपत्रं समर्पयामि।।
ॐ कात्यायन्यै नमः।। तुलसीपत्रं समर्पयामि।।
ॐ कौमार्यै नमः।। जाजीपत्रं समर्पयामि।।
ॐ काल्यै नमः।। काञ्चीपत्रं समर्पयामि।।
ॐ गौर्यै नमः।। उत्पलपत्रं समर्पयामि।।
ॐ लक्ष्मै नमः।। करवीरपत्रं समर्पयामि।।
ॐ सर्वमांगल्यै नमः।। मल्लिकापत्रं
समर्पयामि।।
ॐ रुद्राण्यै नमः।। चम्पकपत्रं समर्पयामि।।
ॐ सरस्वत्यै नमः।। नागचम्पकपत्रं
समर्पयामि।।
भगवत्यै नमः।। सर्वाणि पुष्पाणि समर्पयामि।।
अथ चतुःषष्टियोगिनीपूजा।।
(तत्तन्नामानि स्मृत्वा पूजयेत्।।)
अथ कल्पोक्तषोडशोपचार पूजा।।
देवीं महामायां विचिन्तयेत्।।
ध्यानम्।।
ॐ दुर्गां भगवतीं ध्यायेन्मन्त्राधिदेवताम्।
वाणीं लक्ष्मीं उमां देवीं सरस्वतीम्।
महिषघ्नीं दशभुजां कुमारीं सिंहवाहिनीम्।
दानवांस्तर्जयन्तीं च सर्वकामदुघां शिवाम्।।
दुर्गायै नमः।। ध्यानं समर्पयामि।।
आवाहनम्।।
वाक्श्री दुर्गादिरूपेण विश्वमावृत्य तिष्ठति।
आवाहयामि त्वां देवि सम्यक् सन्निहिता भव।।
आसनम्।।
भद्रकालि नमस्तेस्तु भक्तानामीप्सितार्थदे।
स्वर्णसिंहासनं चारु प्रीत्यर्थं प्रतिगृह्यताम्।।

स्वागतम्।।

सर्वस्वरूपे सर्वेशि सर्वशक्तिसमन्विते।

कृताञ्जलिपुटो भक्त्या स्वागतं कल्पयाम्यहम्।।

अर्घ्यपाद्याचमनम्।।

महालक्ष्मि महामाये महाविद्यास्वरूपिणि।

अर्घ्यपाद्याचमनान्देवि गृहाण परमेश्वरि।।

अर्घ्यम्।। मधुपर्कम्।।

दुर्वाङ्कुरसमायुक्तं गन्धादिसुमनोहरम्।

मधुपर्कं मया दत्तं नारायणि नमोऽस्तु ते।।

स्नानम्।।

स्नानं पञ्चामृतं देवि भद्रकालि जगन्मयि

भक्त्या निवेदितं तुभ्यं विश्वेश्वरि नमोस्तु ते।।

शुद्धोदकसमायुक्तं गंगासलिलमुत्तमम्

यत्समानीतं सुप्रीता वरदा भव।।

वस्त्रम्।। आभरणम्।।

वस्त्रं गृहण देवेशि देवांगसदृशं नवम्।

विश्वेश्वरि महामाये नारायणि नमोऽस्तु ते।।

नानारत्नविचित्राढ्यान् वलयान् सुमनोहरान्।

अलंकारान् गृहाण त्वं मदभीष्टप्रदा भव।।

गन्धम्।।

गन्धं चन्दनसंयुक्तं कुन्दजातिविमिश्रितम्।

गृह्णीष्व देवि लोकेशि जगन्मातर्नमोस्तु ते।।

बिल्ववृक्षकृतावासे बिल्वपत्रप्रिये शुभे।

बिल्ववृक्षसमुद्भूते बिल्वगन्धं प्रतिगृह्यताम्।।

पुष्पाणि।।

मालती बिल्व मन्दार कुन्दजाति विमिश्रितम्।

पुष्पं गृहाण देवेशि सर्वमंगलदा भव।।

अक्षतान्।।

अक्षतान् शुभदान् देवि हरिद्राचूर्णमिश्रितान्

प्रतिगृह्णीष्व कौमारि दुर्गादेवि नमोऽस्तु ते।।

पुनः पुष्पाञ्जलिसमर्पणम्।।

मल्लिकैः करवीरैश्च चम्पकैः शतपुष्पकैः।

पुन्नागैर्बकुलैश्चैव तुभ्यमानन्दरूपिणि।।

(जातवेदसे इत्यादि मन्त्रेण अष्टोत्तर सहस्रंवारं

वा अष्टोत्तरशतवारं वा पुष्पाञ्जलिं समर्पयेत्।।

हिरण्यवर्णामिति पञ्चदशमन्त्रैः पञ्चदश

पुष्पाञ्जलिं च समर्पयेत्।।)

अथ नामत्रय पूजा।।

ॐ श्रीमहाकाल्यै नमः।।

ॐ श्रीमहालक्ष्म्यै नमः।।

ॐ श्रीमहासरस्वत्यै नमः।।

अथ नामपञ्चकपूजा।।

ॐ शक्तिदुर्गायै नमः॥

ॐ राजदुर्गायै नमः॥

ॐ अग्निदुर्गायै नमः॥

ॐ ऐश्वर्यदुर्गायै नमः॥

ॐ रक्षादुर्गायै नमः॥

अथ द्वादशनाम पूजा॥

ॐ आर्यायै नमः॥

ॐ कात्यायन्यै नमः॥

ॐ दुर्गायै नमः॥

ॐ कुमार्यै नमः॥

ॐ विन्ध्यवासिन्यै नमः॥

ॐ वागीश्वर्यै नमः॥

ॐ जगन्मात्रे नमः॥

ॐ शिवदूत्यै नमः॥

ॐ माहेश्वर्यै नमः॥

ॐ सरस्वत्यै नमः॥

ॐ सावित्र्यै नमः॥

ॐ परब्रह्मस्वरूपिण्यै नमः॥

अथाष्टोत्तरशतनामपूजा॥

(यथासंप्रदायं नामानि स्मृत्वा पूजयेत्॥)

(अथवा त्रिशती सहस्रनामभिश्च कुङ्कुमार्चनं कुर्यात्॥)

तदनन्तरं धूप-नैवेद्य-पानीय-ताम्बूल-नीराजनं-प्रार्थन पूर्वक प्रदक्षिण-नमस्कारान् समर्पयेत्॥

सप्तशतीपारायणेन समापयेत्॥

*Yaksha in Praṇāma-mudrā*

# APPENDIX TWO

# आशीर्वादमन्त्राः॥

Prostrations (Praṇāma) are reciprocated with benedictions and blessings (āśīrvachana). There is a Vedic ritual where the blessings are invoked in a standard manner. It is customary for the priest or a group of priests to recite Vedic hymns from Ṛgveda and Yajurveda, as the

*Vyāghrapāda in Chidambaram*

supplicant makes his prostrations, and stands folding his hands. It is also usual for the priest or priests to recite along with the hymns in a samhitā manner the several pāṭhas.) Among the occasions for formal benedictions are religious rituals sponsored by householders, wedding ceremonies where the bride and the bridegroom are blessed, and initiation-rites where the celibate-entrant (vaṭu) is blessed. The benedictions offered by mendicants to the devotees who prostrate before them does not assume the above form; they will merely utter `Nārāyaṇa', `Nārāyaṇa'. The Vedic benediction includes the following hymns.

१. पर्याप्त्या अनन्ताराया‍य ।
सर्वस्तोमोऽतिरात्र।

उत्तममहर्भवति। सर्वस्याप्त्यै सर्वस्य जित्यै।
सर्वमेव तेनाऽऽप्नोति। सर्वं जयति।।

The samhita-pāṭha is given above. The words are broken up and formally recited in Pada-pāṭha, which follows this.

पर्याप्त्या इति परि - आप्त्यै । अनन्तरायायेत्यनन्तः आयाय । सर्वस्तोम इति सर्वस्तोमः

and so on.

Then follows Krama-pāṭha which takes the form :

पर्याप्त्या अनन्तरायाय । पर्याप्त्या इति परि - आप्त्यै।
अनन्तारायाय सर्वस्तोमः। अनन्तरायेत्यन्तः - आयाय।

सर्वस्तोमोऽतिरात्रः । सर्वस्तोम इति सर्व - स्तोमः।

अ ति रात्र उत्तमम्। अति रात्र इत्यति रात्रः ।
उत्तममहः।
उत्तममित्युत्तमम्॥
and so on

The third sequence is Jaṭā-pāṭha :

पर्याप्त्या अनन्तराया यानन्तरायाय । पर्याप्त्यै
पर्याप्त्या
अनन्तरायाय । पर्याप्त्या इति परि - आप्त्यै॥
अनन्तरायाय
सर्वस्तोमः सर्वस्तोमोऽनन्तरायायानन्तरायाय
सर्वस्तोमः।
अनन्तरायायेत्यनन्तः आयाय ॥
सर्वस्तोमोऽतिरात्रोऽतिरात्रः॥

सर्वस्तोमः सर्वस्तोमोऽतिरात्रः। सर्वस्तोम
इति सर्व स्तोमः॥
and so on.

Finally, Ghana-pāṭha for the hymn is recited.

पर्याप्त्या अनन्तरायायानन्तरायाय पर्याप्त्यै
पर्याप्त्या अनन्तरायाय सर्वस्तोमः सर्वस्तोमोऽ
नन्तरायाय पर्याप्त्यै पर्याप्त्या अनन्तरायाय
सर्वस्तोमः। पर्याप्त्या इति परि आप्त्यै॥

अनन्तरायाय सर्वस्तोमः सर्व
स्तोमोऽनन्तरायाया- नन्तरायाय
सर्वस्तोमोऽतिरात्रोऽति रात्रः सर्वस्तोमोऽनन्त-
रायायानन्तरायाय सर्वस्तोमोऽति रात्रः।
अनन्त रायायेऽत्यन्तः - आयाय॥
and so on.

2. For the male Householder :

संज्ञानं विज्ञानं प्रज्ञानं जानदभि जानत्।
संकल्पमानं प्रकल्पमानंमुपकल्पमानमुपकलृप्तं
कलृप्तं श्रेयोवसीय आयत्संभूतं भूतम्॥

चित्रः केतु प्रभनाभाथ्संभान् ज्येतिष्मां
स्तेजस्वानातपंस्तपन्नभितपन्॥

रोचनो रोचमानः शोभनः शोभमानः
कल्याणः॥

शतमानं भवति शतायुः पुरुषः शतेन्द्रिय
आयुष्येवेन्द्रिये प्रति तिष्ठति॥

3. For the woman accompany ing her husband :

सुमंगलीरियं वधूरिमां समेत पश्यत।
सौभाग्यमस्यै दत्त्वायाथास्तं विपरेतन॥

4. For the husband and spouse together :

अनयोर्दम्पत्योः अविच्छिन्ना प्रीतिरस्तु॥

5. The hymn to be followed by the four pāṭhas as mentioned above.

पुनस्त्वादित्या रुद्रावस वसः समिन्धताम्।
पुनर्ब्रह्माणो वसुनीथ यज्ञैः।
घृतेन त्वं तनवो वर्धयस्व।
सत्याः त्वं तनवो वर्धयस्व।
सत्याः सन्तु यजमानस्य कामाः॥

6. For the newly initiated boy (vaṭu or brahmachāri)

हिरण्यपात्रं मधोः पूर्णं ददाति। मधव्यो
सानीति।
एकधा ब्रह्मण उपहरति। एकधैव यजमान
आयुस्ते जोदधाति॥

तेजस्वी यशस्वी ब्रह्मवर्चसी स्यामिति।
प्राङ् होतुधिष्ण्यादुत्सर्पेत्॥

येऽयं प्रागाद्यशस्वती। सा मा प्रोर्णोतु।
तेजसा यशसा ब्रह्मवर्चसेनेति।
तेजस्व्येव यशस्वी ब्रह्मवर्चसी भवति।
अस्य वटोः प्रणवश्रद्धा मेधा धारणा
सिद्धिरस्तु॥

7. For the sacrificer (yajamāna) in a religious ritual.

एता असदन्थसुकृतस्य लोके ता विष्णो
पाहि पाहि यज्ञं पाहि यज्ञपतिं पाहि मां
यज्ञनियम्॥



*Bhṛṅgi*

This is to be follwed by the four pāṭhas mentioned above.

8. For general occasions:

इदं विष्णुर्विचक्रम इति व्यक्रमत।
यस्मात्पशवः प्रप्रेवभ्रं शेरन्।
स ऐतेन यजेत। यदाप्नोत्।
तदप्तोर्यामस्याप्तोर्यामत्वं।
एतेन वै देवा चैत्वानि जित्वा॥
यं काममकामयं ततमाप्नुवन्।
यं कामं कामयते। तमेतेनाऽऽप्नोति॥

शतमानं भवति शतायुः पुरुषः शतेन्द्रिय
आयुष्येवेन्द्रिये प्रति तिष्ठति॥

सुमंगलीरियं वधूरिमां समेत पश्य
सौभाग्यमस्मै दत्त्वा यथास्तं विपरेतन॥

अनयोर्दम्पत्योः अविच्छिन्ना प्रीतिरस्तु॥

9. एतैरायुष्कामः। प्रजापशुकामो वा।
पुरस्ताद्दशहोतारमुदं चमुपधाति यावत्पदम्।
हृदयं यजुषी पत्नौ च । दक्षिणतः प्रांचं
चतुर्होतारम्। पश्चादुदं च पञ्चहोतारम्। उत्तरतः
प्राञ्चं षड्ढोतारम्। उपरिष्टात् प्राञ्चं
सप्तहोतारम्॥

हृदयं यजूंषि पल्यश्च। यथावकाशं ग्रहान्।
यथावकाशं प्रतिग्रहान् लोकं पृणाश्च।
सर्वाहास्यैता देवताः प्रीता अभीष्टा भवन्ति॥

शतमानं भवति शतायुः पुरुषः।
शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठति॥

10. नवो नवो भवति जायमानोऽह्नां
केतुरुषसामेत्यग्रे।
भागं देवेभ्यो दिदधात्यायन् प्र चन्द्रमास्तिरति
दीर्घमायुः

(to be followed by the pāṭhas)

11. Benedictions to the newly married couple (from Ṛgveda)

सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः।
तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः॥

सोमो ददद्गन्धर्वाय गन्धर्वो दददग्नये।
रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमाम्।।

इहैवस्तं मा वियौष्टं विश्वमायुर्व्यश्नुतम्।
क्रीळन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे।।

आ नः प्रजां जनयतु
प्रजापतिराजरसायमनक्तवर्ममा।
आदुर्मंगलीः पतिलोकमाविश शं नो भव
द्विपदे शं चतुष्पदे।।

अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः
सुवर्चाः।
वीरसूर्देवकामा। स्योना। शं नो भव द्विपदे शं
चतुष्पदे।।

इमां त्वमिन्द्रमीढ्वः सुपुत्रां सुभगां कृणु।
दशास्यां पुत्रानाधेहि पतिमेकादशं कृधि।
संम्राज्ञी श्वशुरे भव संम्राज्ञी अधि देवेषु।।

समञ्जन्तु विश्वे देवाः समापो हृदयानि नो।
सं मातरिश्वा सं धाता समुदेष्ट्री दधातु नौ।।

अविधवा भव वर्षाणि शतं साग्रं तु सुव्रता।
तेजस्वी च यशस्वी च धर्मपत्नी पतिव्रता।।

जनयद् बहुपुत्राणि मा च दुःखं लभेत्
क्वचित्।
भर्ता ते सोमपा नित्यं भवेद्धर्मपरायणः।।

अष्टपुत्रा भव त्वं च सुभगा च पतिव्रता।
भर्तुश्चैव पितुर्भ्रातुर्हृदयानन्दिनी सदा।।

इन्द्रस्य तु यथेन्द्राणी श्रीधरस्य यथा श्रिया।
शंकरस्य यथा गौरी तद् भर्तुरपि भर्तरि।।

अत्रेर्यथाऽनुसूया स्याद्वसिष्ठस्याऽप्यरुन्धती।
कौशिकस्य यथा सती तथा त्वमपि भर्तरि।।

ध्रुवैधि पोष्यामयि मह्यं त्वादाद् बृहस्पतिः।
मया पत्या प्रजावती सञ्जीव शरदः शतम्।।

शंत जीव शतं शरदो वर्धमानः शतं
हेमन्तांच्छतमु वसन्तान्।
शतमिन्द्राग्निः सविता बृहस्पतिः शतायुषा
हविषेमं पुनर्दुः।।



*Bhakthānjaneya*

आहार्षंत्वा विदुं त्वा पुनरागाः पुनर्नव।
सर्वांग सतं ते चक्षुः सर्वमायुश्च ते विदम्।।

12. Benedictions for the newly initiate (vaṭu) (from Ṛgveda)

अग्ने तेजस्विन् तेजस्वी त्वं देवेषु
भूयास्तेजस्वन्तं मामायुष्मन्तं वर्चस्वन्तं मनुष्येषु
कुरु!
दीक्षायै च त्वा तपसश्च तेजसे जुहोमि।
तेजोविदसि तेजो मा महासीन्माहं
तेजोऽहासिषं मा मां
तेजोऽहासीदिन्द्रैज्वन्नोजस्वी त्वं देवेषु।।

भूया ओजस्वन्तं मामायुष्मन्तं वर्चस्वन्तं
मनुष्येषु कुरु।

ब्रह्मणश्च त्वा क्षत्रस्य चौजसे
जुहोम्योजोविदस्योजो मामाहासीन्माहमोजोऽ
हासिषं मा मा मोजोऽहासिध्रूर्यभ्राजस्वीन्
भ्रजस्वी त्वं देवेषु भूया। भ्राजस्वन्तं मा
मायुष्मन्तं वर्चस्वन्तं मनुष्येषु कुरु। वायोश्च
त्वापां च भ्राजसे जुहोमि सुवर्विदसि सुवर्मा
माहासीन्माहं सुवऽर्हासिषं मा मां
सुवर्हासीन्मयि मेधां मयि प्रजां मय्यग्निस्तेजो
दधातु । मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं
दधातु। मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो
दधातु।।

13. Benedictions to newly married couple (from Yajurveda)

वधूवरयोराशीर्वचन्।।
अस्मे देवासो वपुषे चिकित्सत यमाशिरा
दम्पती वाममश्नुतः।
पुमान्पुत्रो जायते विन्दते वस्पथविश्वे अरपा
एधते गृहः।।

आशीर्दाया दम्पती वाममश्नुतामरिष्टो रायः
सचतां समोह। य आसिचत्सं दुग्धं
कुंभ्यासहेष्टेऽनयामन्नमतिं जहातु सः। सर्पिर्ग्रीवी
पीवरस्य जाया पीवानः पुत्रा अकृशासो
अस्य।
सहजा निर्यःसु मुखस्य मान  इन्द्राया शिरं
सह कुंभ्यादात्।।

आशीर्म ऊर्जमुत सुप्रजास्त्वमिषं दधातु द्रविणं सवर्चसम्। सञ्जयन् क्षेत्राणि सह साहमिन्द्र कृण्वानो अन्यां अधराथ्सपत्नान्।।

आशिषमेवैता माऽशास्ते पूर्णपात्रे ।
अन्ततोऽनुष्टुभा।
चतुष्पद्वा एतच्छन्दः प्रतिष्ठितं पत्नियै पूर्णपात्रे भवति।।

अस्मिन् लोके प्रति तिष्ठानीति। अस्मिन्नेव लोके प्रति तिष्ठति। अथो वाग्वा अनुष्टुप् वाङ्मिथुनम्। आपो रेतः प्रजननम्। एतस्माद्वै मिथुनाद्विद्योतमानस्तनयन्वर्षति । रेतः सिञ्चन्। प्रजाः प्रजनयन्। यद्वै यज्ञस्य ब्रह्मणा युज्यते। ब्रह्मणा हैतस्य विमोकः। अद्भिः शान्तिः। विमुक्तं वा एतर्हि योक्त्रं ब्रह्मणा। आदायैनत्पत्नी सहाप उपगृहीते शान्त्यै। अञ्जलौ पूर्णपात्रमानयति। रेत एवास्यां प्रजां दधाति। प्रजया हि मनुष्यः पूर्णः। मुखं विमृष्टे। अवभृथस्यैवरूपं कृत्वोऽत्तिष्टति।। गोमृगकण्ठेन प्रथमामाहुतिं जुहोति। पशवो वै गोमृगः। रुद्रोऽग्निस्त्विष्टकृत्। रुद्रादेव पशूनन्तर्दधाति। अथो यत्रैषाहुतीर्हूयते। न तत्र रुद्रः पशूनभिमन्यते। अश्वशफेन द्वितीयमाहुतिं जुहोति। पशवो वा एकशफम्। रुद्रोऽग्निस्त्विष्टकृत्। रुद्रादेव पशूनन्तर्दधाति।। अथो यत्रैषाहुतिर्हूयते। न तत्र रुद्रः पशूनभिमन्यते।।

अयस्मयेन कमण्डुलुना तृतीयाम्। आहुतिं जुहोत्यायास्यो वै प्रजाः। रुद्रोऽग्निस्त्विष्टकृत्। रुद्रादेव प्रजा अन्तर्दधाति। अथो यत्रैषा - हुतिर्हूयते। न तत्र रुद्रः प्रजा अभिमन्यते।। अपश्यं त्वा मनसा चेकितानं। तपसो जातं तपसो विभूतम्। इह प्रजामिह रयिं रराणः प्रजयस्व प्रजया पुत्रकामे।। अपश्यं त्वा मनसा दीद्यानं स्वायं तनूं ऋत्वियेनाथमानाम्। उपमामुच्चायुवतिर्बभूयाः प्रजायस्व प्रजया पुत्रकामे।।

शतमानं भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठति। सुमंगलीरियं

वधूरिमां समेत पश्यत।

सौभाग्यमस्मै दत्त्वा याथास्तं विपरेतन॥

अनयोः दम्पत्यौः अविच्छिन्ना प्रीतिरस्तु॥

(अनयोर्दम्पत्योः वेदोक्तं दीर्घमायुष्यं भूयादिति

तत्र महान्तः भवन्तः अनुगृह्णन्तु॥)

14. General benediction for the welfare of all

सद्यः सुवृष्ट्या सर्वे नदनदीतटाकाः।

सम्पूर्णा भूयासुरिति भवन्तः महान्तोऽगृह्णन्तु॥

देशोऽयं निरुपद्रवोऽस्तु॥

प्रजापालकाः न्यायेन मार्गेण महीं पालयन्तु।

लोकाः समस्ताः सुखिनो भवन्तु॥

अपुत्रिणः पुत्रिणः सन्तु पुत्रिणः पौत्रिणः सन्तु।

धनरहिताः धनयुक्ताः सन्तु॥

सर्वे शरदां शतं जीवन्त्विति भवन्तो

महान्तो ऽनु गृह्णन्तु॥

समस्तसन्मंगलानि भवन्तु॥

सत्या एता आशिषः सन्तु॥ तथास्तु॥

*Rāmānujācharya (pañchaloha statue)*





*Kannappa*



*Anugraha murti*

# APPENDIX THREE

# VṚDDHĀBHIVĀDANAM

The following excerpt giving all details concerning prostrations to elders who teachers is taken from *Smṛti-muktāvali* by Kṛshṇa-sūri (section on `Vṛddhābhivādanam')

अथ वृद्धाभिवादनम्।।
वृद्धाभिवादनं याज्ञवल्क्यो मुनिरथाब्रवीत्।
ततोऽभिवादयेद् वृद्धानसावहमिति ब्रुवन् इति।।

अभिवादनप्रकारं तु विस्पष्टं मनुरब्रवीत्।
अभिवादात् परं विप्रो ज्यायांसमभिवादयन्।।

असौ नामाहमस्मीति स्वं नाम परिकीर्तयेत्।
भोशब्दं कीर्तयेदन्ते स्वस्वनाम्नोभिवादन इति।
तथाचैवं वचनव्यक्तिः,

अभिवादये देवदत्तनामाऽ हमस्मि भो इति।।

अभिवादनप्रकारं वर्णानुरूपेणाह आपस्तम्बः।
दक्षिणं बाहुं श्रोत्रसमं प्रसार्य ब्राह्मणोऽभिवा-
दयीत।।

उरस्समं राजन्यो मध्यसमं वैश्यो नीचैः शूद्रः
प्राञ्जलिरिति।
नीचैः पादसममित्यर्थः।
हस्तद्वयेन कार्यं तदन्यथा दोषभाग्भवेत्।
अत्र विष्णुः जन्मप्रभृति यत्किञ्चित्सा
धर्ममाचरेत्।
सर्वं तन्निष्फलं यायादेकहस्ताभिवादनात्।।

हस्तद्वयनमस्कारो विद्वत्स्वेव प्रकीर्तितः।
अतः स एवाह - मूर्खानां चैकपाणिनेऽति।।

अत्रिरपि -

दक्षिणं पाणिमुद्धृत्य प्रकाममभिवादयेत्।
श्रोत्रिये त्वञ्जलिः कार्यः पादोपग्रहणाद्गुरो
रिति।।

विप्रसंस्थाभिवादे तु विशेषमवदन्मनुः।
लौकिकं वैदिकं वापि तथाध्यत्मिकमेव वा।
आददीत यतो ज्ञानं तं पूर्वमभिवादयेदिति।।

प्रत्युत्थायैव कर्तव्यमभिवादनमादरात्।

आपस्तम्बः-

सर्वत्र प्रत्युत्थायाभिवादयेदिति।।

मनुश्च

ऊर्ध्वप्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते।
अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।।

चत्वारि तस्य वर्धन्ते ह्यायुः प्रज्ञा यशो बलम्।
प्रत्याभिवादनप्रकारमाहापस्तम्बः -

पावनं च नाम्नोऽभिवादनप्रत्यभिवादने च पूर्वेषां वर्णानामिति।।

अत्र हरदत्तः-

अभिवादनस्य यत् प्रत्यभिवादनं तत्राभिवादयितुर्नाम्नि प्लावनं कर्तव्यं पुतः कर्तव्यः।

पूर्वेषां वर्णानां शुद्रवर्जितानामभिवादयमानाना मित्यर्थः।
प्रत्यभिवादेऽशूद्र इति पाणिनीयस्मरणात्।
तत्र वाक्यस्य टेः प्लुत उदात्त इत्यनुवृत्तेः प्रत्यभिवादवाक्यस्यान्ते नामप्रयोगः कर्तव्यः।
तस्य टेरन्त्यात् प्रभृतेः प्लुतो भवति शूद्रव्यतिरिक्तप्रत्यभिवादनविषय इति।।

आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने।
अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्वाक्षरप्लुत इति वचनान्नाम्नश्च पश्चादकारः आयुष्मान् भव सौम्य देवदत्ता, ३ इति प्रयोगः कार्यः।।

इकारान्तउकारान्तशम्भुविष्ण्वादिनाम्नां प्रत्यभिवादने विशेषोऽस्ति।
शम्भुर्नाम कश्चित्। चक्रपाणिरित्यपि कश्चित्।
तयोः प्रत्यभिवादने ह्रस्वस्य गुण इति सूत्रेण सम्बुद्धौ गुणे कृते शम्भो चक्रपाणे इति स्थिते तत्र त्यभिवादनेऽशूद्र इत्यनेन प्लुते क्रियमाणे एचोऽप्रगृह्यस्य अदूराद् धूते पूर्वस्यार्धस्या दुत्तरस्येदुतौ इत्यनेन विधिना च प्रगृह्य संज्ञारहितस्य एचोदूरादाहवानव्यतिरिक्तविषये पूर्वार्धस्याकारः।
उत्तरभागस्य यथाक्रमं इकारोकारौ भवतः।
एवञ्च शम्भो इत्यत्र ओकारस्य पूर्वभागस्याकारः उत्तरभागस्य उकारो भवति।
शम्भा उ चक्रपाणा इ इति स्थिते नाम्नोऽन्ते अकारे कृते तयोः य्वावचि संहिताया मित्यनेन तयोः इकारोकारयोर्यथाक्रमं यकारवकारौ संहितायां विषये भवतः।
तथाचेत्थं प्रयोगः शम्भाव, चक्रपाणाय, इति।
एवञ्चाभिवादकनामगतान्तिमस्वरातिरिक्तो पूर्वोऽकारः पठितव्यः।

अन्त्यस्वरश्च प्लावयितव्य इति हरदत्तादीनां मतम्।

यदा तु नाम्नोऽन्तेऽकारो नास्ति तदा अच्परत्वाभावेन तयोः य्वावचि संहिताया मित्यस्याप्रवृत्तेः शम्भा उ, चक्रपाणा इ, इति प्रयोगो द्रष्टव्यः।

चन्द्रिकाकारादयस्तु अस्य मनुवचनस्यान्यथा तात्पर्यमाहुः। तथा हि, पूर्वाक्षर इत्यस्यायमर्थः, पूर्वमक्षरं यस्यासौ पूर्वाक्षरः। पूर्वमक्षरं च सामर्थ्याद् व्यञ्जनम्। स्वराणां स्वरपूर्वकत्वासम्भवात्। ततश्चाभिवादकनामगतो व्यञ्जनान्तिमः स्वरः प्लानीयः। अकारेणान्तिमस्वरमात्रमुपलक्ष्यते। अशेषनाम्नामकारान्तत्वाभावात्। तथा च अकारं विनैव प्रयोगः कार्यः। आयुष्मान् भव सौम्य देवदत्ता ३ इति।।

एवं चैतेषां मते पूर्वाक्षर इति पृथक् पदम्। अत्रातिरिक्ताकारपक्ष एव शिष्टाचारानुगुणः।

वसिष्ठोऽपि

- आमन्त्रिते कर्तव्येऽभिवादकनाम्नामन्ते यः स्वरः स प्लुतो भवतीति'। त्रिमात्रो भवतीत्यर्थः।

नामोक्तिं यो न जानाति ह्यहं भो इति तं वदेत्।

मनुः

नामधेयस्य ये केचिदभिवादं न जानते।
तान् प्रज्ञोऽहमिति ब्रूयात् स्त्रियः सर्वास्तथैव चेति।।

यस्तु प्रत्यभिवादस्य स्वरूपं नैव बुध्यते।
तं नाभिवादयद्विद्वानित्याह भगवान् मनुः।
यो न वेत्त्याभिवादस्य विप्रः प्रत्यभिवादनम्।
नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव स इति।।
स दोषभाक् पुमान् जानन् यो न प्रत्यभिवादयेत्।

भविष्योत्तरपुराणे

- अभिवादे कृते वस्तु न करोत्यभिवादनम्।
आशिषं वा न कुरुते स याति नरकं ध्रुवम्।
तस्मात् कृताभिवादः (पूर्वाभिभाषी)
स्याच्चाण्डालस्यापि धर्मवित्।

सुरां पिबेति वक्तव्यमेवं धर्मो न हीयत इति।।

वृद्धेष्वेव हि कर्तव्यमेतदप्यभिवादनम्।
अत एव ज्यायांसमाभिवादयन्निति मनुस्मरणम्।

वयोज्ञानादिनेत्यर्थः।।
अत एव बोधायनो मान्यत्वे ऋत्विगादीनां
यवीयसां प्रत्युत्थायाभिभाषणमात्रमाह -
ऋत्विक्श्वशुरपितृव्यमातुलानां तु यवीयसां
प्रत्युत्थायाभिभाषणमिति।
मनुर्हि भगवान् प्राह नियमं चाभिभाषणे।
ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम्।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव चेति।।

आपस्तम्बोऽन्यथा विशेषमाह

- कुशलमपरवयसं वयस्यं वा पृच्छेदिति।।

स्त्रीसम्भाषणानियममाह मनुः
- परपत्नी च या स्त्रि स्यादसम्बन्धा च योनितः।
तां ब्रूयाद्भवतीत्येव सुभगो भगिनीति वेति।।

स्त्रिष्वपि वृद्धास्वभिवादनमेव मन्तव्यम्।
विप्रमन्ये नमस्कुर्युर्विप्रस्तान्न नमेत् क्वचित्।

शातातपः -
अभिवाद्यो नमस्कार्यः शिरसा वन्द्य एव च।
ब्राह्मणः क्षत्रविट्शूद्रैः श्रीकामैः सादरं सदा।।

नाभिवाद्यास्तु विप्रेण क्षत्रियाद्याः कथञ्चन।
ज्ञानकर्मगुणोपेता यद्यप्येते बहुश्रुताः।।

क्षत्रं वैश्यं वाभिवाद्य प्रायश्चित्तं कथं भवेत्।
ब्राह्मणानां दशाष्टौ वा अभिवाद्य विशुध्यति।।

गुर्वादिष्वभिवादने विशेषमाह मनुः -
व्यत्यस्तपाणिना कार्यमुपसङ्ग्रहणं गुरोः।
सव्येन सव्यस्प्रष्टव्यो दक्षिणेन तु दक्षिण इति।।

एतच्च गुरुपत्नीनामपि कार्यं तथा स एव -
गुरुवत् प्रतिपूज्याः स्युः सवर्णा गुरुयोषितः।
असवर्णास्तु सम्पूज्याः प्रत्युत्थानाभिवादनै रिति।।
उपसङ्ग्रहणं भ्रातुर्भार्ययाश्च तथैव हि।

मनुः-

भ्रातुर्भार्योपसङ्ग्राह्या सवर्णाहन्यहन्यपि।
विप्रोष्य तूपसङ्ग्राह्या ज्ञातिसम्बन्धियोषित इति।।

उपसङ्ग्रहणे प्राप्ते सर्वासामविशेषतः।
अपवादं क्वचिच्चाह मनुर्धर्मविदां वरः।।

गुरुपत्नी तु युवतिर्नाभिवाद्येह पादयोः।
पूर्णविंशतिवर्षेण गुणदोषौ विजानता।।

कामं तु गुरुपत्नीनां युवतीनां युवा भुवि।
विधिवद्वन्दनं कुर्यादसावहमिति ब्रुवन् इति।।

अत्राभिवादनविधिमापस्तम्बोऽब्रवीन्मुनिः।
न सोपानट् न वेष्टितशिरा वावहितपाणिना - भिवादयीत।
(अवहितपाणिः प्रसारितपाणिः। प्रचेता अपि - सोपानट्)
कस्त्वाचमनशयनयानारोहणाभिवादननमस्कारादीन् वर्जयेदिति।।

शङ्खोऽपि :-

नोदकुम्भहस्तोऽभिवादयेन्न भैक्षं चरन्न
पुष्पाज्यहस्तो नाशुचिर्न जपन्न देवपितृकार्यं
कुर्वन्न शयान इति।।

आपस्ताम्बोऽपि :-
अप्रयतेन नाभिवाद्यं नाप्रयतायाप्रयतश्च न प्रत्यभिवादयेदिति।
अभिवाद्ये विशेषोऽपि आपस्तम्बेन चोदितः।
समित्पुष्पकुशाग्न्यम्बुमृदन्नाक्षतपाणिकम्।
जपं होमं च कुर्वाणं नाभिवादेन वै द्विज मिति।।

कात्यायनोऽपि
स्रक्पाणिकमनाज्ञातमशक्तं रिपुमातुरम्।
योगिनं च तपस्सक्तं कनिष्ठं नाभिवादयेत् इति।।

शातातपोऽपि -
उदक्यां सूतिकां नारीं भर्तृघ्नीं भर्तृघातिनीम्।
अभिवादेद्द्विजो मोहादहोरात्रेण शुद्ध्यति।।



*Garuda* *(Lepakshi)*

पाषण्डं पतितं व्रात्यं महापातकिनं शठम्।
नास्तिकं कितवं स्तेनं कृतघ्नं नाभिवादयेत्।।

धावन्तं च प्रमत्तं च मूत्रोच्चारकृतं तथा।
भुञ्जानमाचमानार्हं नाभिवाद्याद्द्विजोत्तमः।।

वमन्तं जृम्भमाणं च कुर्वन्तं दन्तधावनम्।
अभ्यक्तशिरसं चैव स्नास्यन्तं नाभिवादये
दिति।।

यत्यादिदर्शने सद्यो नमस्कारो हि चोदितः।

जमदग्नि -

देवताप्रतिमां दृष्ट्वा यतिं चैव
त्रिदण्डिनम्।।

नमस्कारं न कुर्याच्चेदुपवासेन शुध्यति।।
इत्यभिवादननिरूपणम्।।

The same text gives an account of the benefits of prostrations performed for the ancestral spirits (manes, pitṛs), during the śrāddha-ritual. At the conclusion of the ritual, the spirits are discharged with prostrations (pitṛ-visarjanam)

उत्तिष्ठत पितर इत्युत्थाप्य प्रदक्षिणम्।
अभ्यर्चयेद् द्विजांस्तेऽपि प्रतिब्रूयुर्यथेत्सितम्।।

दक्षिणाभिमुखस्तिष्ठन् दातारस्तु वदेदयम्।
तथास्त्विति प्रतिब्रूयुर्दद्यात् पुष्पाक्षतानि च।।

आयुः पुत्र धनारेग्यं शान्त्यर्थं वाचयेद्विजान्।
अन्नशेषमनुज्ञाप्य नमस्कृत्य निवर्तयेत्।।

(इति बृहस्पतिः)
विसर्जिते तु पितरि गते याम्यां दिशं प्रति।
पादाभ्यंगं ततः कुर्यात्पृषदाज्येन वारिभिः।
अद्य मे सफलं जन्म भवत्पादाभिवन्दनात्।।

अद्य मे वंशजाः सर्वे याता वोऽनुग्रहाद्दिवम्।
पत्रशाकादिदानेन क्लेशिता यूयमीदृशाः।
तत् क्लेशजातं चित्ते तु विस्मृत्य क्षन्तुमर्हथ।।
(व्यासस्मृतिः)